# ।। प्रकरणम्-१ ।।

# ।। प्रास्ताविकम् ।।


| क्रमः | प्रकरणनाम | पृष्ठसंख्या |
|---|---|---|
| १.१ | चत्वारो वेदाः । | 4-65 |
| १.२ | वेदानामुपादेयता । | |
| १.३ | षड्दर्शनानां परिचयः । | |
| १.३.१ | दर्शनशब्दस्य निर्वचनम् । | |
| १.३.२ | दर्शनशास्त्रस्य प्रादुर्भावः । | |
| १.३.३ | दर्शनशास्त्रस्य भेदाः । | |
| १.३.३.१. | सांख्यदर्शनम् । | |
| १.३.३.१.१ | सांख्यशब्दस्य निर्वचनम् । | |
| १.३.३.२. | योगदर्शनम् । | |
| १.३.३.२.१ | योगशब्दस्य निर्वचनम् । | |
| १.३.३.३. | न्यायदर्शनम् । | |
| १.३.३.३.१ | न्यायशब्दस्य निर्वचनम् । | |
| १.३.३.३.२ | न्यायदर्शनस्य विविधानि नामानि । | |
| १.३.३.४. | वैशेषिकदर्शनम् । | |
| १.३.३.४.१ | वैशेषिकशब्दस्य निर्वचनम् । | |
| १.३.३.४.२ | वैशेषिकदर्शनस्य प्रवर्तकः । | |
| १.३.३.५. | पूर्वमीमांसादर्शनम् । | |
| १.३.३.५.१ | मीमांसाशब्दस्य निर्वचनम् । | |
| १.३.३.६. | (वेदान्तः) उत्तरमीमांसादर्शनम् । | |

१.३.३.७. चार्वाकदर्शनम् ।
१.३.३.७.१ चार्वाकशब्दस्य निर्वचनम् ।
१.३.३.७.२ चार्वाकदर्शनस्य प्रवर्तकः ।
१.३.३.८. जैनदर्शनम् ।
१.३.३.८.१ जैनशब्दस्य निर्वचनम् ।
१.३.३.८.२ जैनदर्शनस्य प्रवर्तकः ।
१.३.३.९. बौद्धदर्शनम् ।
१.३.३.९.१ बौद्धशब्दस्य निर्वचनम् ।
१.४ दर्शनग्रन्थानामुपादेयता ।
१.५ सांख्यदर्शनस्य परिचयः ।
१.५.१ सांख्यशब्दस्य निर्वचनम् ।
१.५.२ सांख्यशब्दस्य विविधा अर्थाः ।
१.५.३ सांख्यदर्शनस्य प्रवर्तकः ।
१.५.४ सांख्यदर्शनस्य ग्रन्थाः ।
१.५.५ सांख्यदर्शनस्य प्रतिपाद्यविषयः।
१.६ वेदाङ्गानां परिचयः ।
१.६.१ छन्दःशास्त्रम् ।
१.६.२ कल्पशास्त्रम् ।
१.६.३ ज्यौतिषशास्त्रम् ।
१.६.४ निरुक्तशास्त्रम् ।
१.६.५ शिक्षाशास्त्रम् ।
१.६.६ व्याकरणशास्त्रम् ।
१.६.६.१ ऐन्द्रम् ।

१.६.६.२ चान्द्रम् ।

१.६.६.३ काशकृत्स्नम् ।

१.६.६.४ कौमारम् ।

१.६.६.५ सारस्वतम् ।

१.६.६.६ आपिशलम् ।

१.६.६.७ शाकलम् ।

१.६.६.८ पाणिनीयव्याकरणम् ।

१.७ वेदाङ्गानामुपादेयता ।

१.८ उपसंहारः ।

## ।। शोधमहानिबन्धः ।।

**विषयः पुराणेषु सांख्ययोगवेदान्तविमर्शः ।**

**प्रकरणम् १ प्रास्ताविकम् ।**

गजाननं नमस्कृत्य शारदाञ्च तथैव च ।
शोधप्रबन्धसारं च विषयस्य लिखाम्यहम् ।।

तस्य श्रुतस्य मननार्थमथोपदेष्टुं
सद्युक्तिजालमिह सांख्यकृदाविरासीत् ।
नारायणः कपिलमूर्त्तरशेषदुःख-
हानाय जीवनिवहस्य नमोस्तु तस्मै[1] ।।

श्रुतिस्मृती तु नेत्रे द्वे पुराणं हृदयं स्मृतम् ।
श्रुतिस्मृतिभ्यां हीनोन्धः काणः स्यादेकया विना ।।
पुराणहीनाद्धृच्छून्यात्काणान्धावपि तौ वरौ ।
श्रुतिस्मृत्युदितो धर्मः पुराणे परिगीयते ।।
यस्य धर्मेस्ति जिज्ञासा यस्य पापाद्धयं महत् ।
श्रोतव्यानि पुराणानि धर्ममूलानि तेन वै ।।
चतुर्दशसु विद्यासु पुराणं दीप उत्तमः ।
अन्धोपि न तदालोकात्संसाराब्धौ क्वचित्पतेत्[2] ।।
यत्प्रभापटलोद्भासा भासतेद्यापि भारतम् ।
दिव्यं तत्संस्कृतं ज्योतिरासंसारं प्रकाशते ।।
धन्यं भारतभूतलं सुललितं सारस्वतं मन्दिरम्
धन्या संस्कृतवाक् सुधेव मधुरा गीर्वाणसंसेविता।

---

1 सांख्यप्रवचनभाष्य १।३
2 कल्याण-पुराणकथाङ्क-पृष्ठसंख्या-८

**धन्याश्च प्रतिभायुताः सुकवयः पाण्डित्यसम्मण्डिताः**
**तेषां सूक्तिसुधारसाः क्षितितले दीव्यात्समाः शाश्वतीः ।।**
**उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणम् ।**
**वर्षं तद्भारतं नाम भारती यत्र सन्ततिः ।।**

यत्र भारतमिति नाम श्रुत्वैव वर्तमानकालेपि सम्पूर्णं विश्वमाकर्षति तद्भारतम्, भारतन्नाम भायां रतमिति भारतम् । समस्तस्यापि महीमण्डलस्य विद्यमानेषु विविधेषु देशेषु मूर्धन्योयं भारतवर्षः । भारतवासिनां चरित्रसुगन्धेन जनमनांसि मोदयन् राजते । यस्मिन् काले सभ्यमूर्धन्यानां देशवासिनां पूर्वजा दिगम्बरा आसन् , तस्मिन्नपि काले परमपवित्रं साधुचरित्रं सुसंस्कृतिसंस्कृतं जीवनं यापयन्ति स्म भारतवासिनः । क्रमशो जाते सभ्यताप्रसारेस्यैव देशस्य संस्कृतिप्रकाशे दृष्टा लोकजीवनयोग्यतमा सुरम्या सरणिरन्यदेशीयैः निवासिभिरिति मनुस्मृतिकारो मनुः मनुस्मृतौ भारतवर्षस्य नितरां प्रशंसामगायत् , तामेव प्रशंसां सर्वे गायन्तः कथयन्ति यद् -

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः**[३] **।।**

एवं च समस्तेपि संसारे मूर्धन्यतामापन्नोयं देशः प्राचीनकालत एव 'विश्वगुरुः' इति भव्योपाधेः विभूषित आसीत् । स एवायं देशो यत्र च संसारं निःसारं मन्यमानाः प्रातःस्मरणीया ऋषयो महर्षयो मुनयश्च परःशतानि वर्षाणि तपांसि तप्त्वा तत्परमं ज्योतिः प्राप्तवन्तः । तेषां धर्मः समृद्धः सुरद्रुमः शोभते, यस्य शाखामात्रा एव गण्यन्ते विविधा धर्माः । एवं च धर्म - सदाचार - संस्कृति - सभ्यतादिभिः

[3] मनुस्मृतिः

सर्वाग्रगण्यो वर्ततेस्मदीयं भारतवर्षम् । साहित्यदृष्ट्यापि भारतवर्षोयं सर्वान् देशान् अतिशेते । अस्मिन् देशे न केवलं पुरुषा एव, अपि तु विराजन्ते स्म मैत्रेयीसदृशब्रह्मविचारदक्षाः, शारदासदृशा वैदुष्यमण्डिताः, सीतासदृशाः पवित्राचरणा महापुरुषाः । हिमवत्प्रहरिणी गङ्गा - यमुना - सरस्वतीशोभिनी सस्यश्यामला विविधजनमोदिनी मध्यभागमोहिनी विन्ध्यादिपर्वतमालाशोभिनी सततरत्नाकरशोभिनी भारतभूमिनान्यं निर्देशनमपेक्षते स्वसाम्यार्थम् । एतामेव अनिर्वाच्यां सुषमा - सुधा नयनपुटैः निभाल्य अनेकैर्भावकैः कविवरैर्यो अस्याश्चरणेषु कल्पनासुरभिः पद्यप्रसूनाञ्जलिः सश्रद्धं समर्पितः, स एव अद्यापि प्रीणाति साहित्यप्रणयिनां चेतांसि । यामेव समाश्रित्य समुद्भासिता संस्कृतिः सर्वानेव देशान् पुनाति । यया प्रदर्शिता सदाचारसरणिरेव सर्वासु सरणिषु राजमार्गतामालम्बते । यस्या विनिर्गतं सत्साहित्यं सर्वानेव साहित्यान् अतिशेते । यस्याः पादप्रक्षालने नियुक्तः क्षारपानीयः समुद्रोपि रत्नाकर इति भव्यान्वयं भजते । यस्यां विविधा मानवा जननीक्रोडसुखमनुभवन्तो निर्बाधं जीवनयात्रां सम्पादयन्ति । तस्या भारतभुवो महिमा सर्वातिशायी वर्तत एव । अत एव तामेव भारतभुवं स्तुवन् श्रीभर्तृहरिर्गायति यद् -

**गायन्ति देवाः किल गीतकानि**
**धन्यास्तु ते भारतभूमिभागे ।**
**स्वर्गापवर्गास्पदमार्गभूते**
**भवन्ति भूयो मनुजाः सुरत्वात्[4] ।।**

[4] नीतिशतकम्

# पुराणेषु सांख्ययोगवेदान्तविमर्शः

तामेव भारतभुवं स्तुवन् एम.एस.युनिवर्सिटीद्वारा स्वीकृतं 'पुराणेषु सांख्ययोगवेदान्तविमर्शः' इति विषयमिममवलम्ब्य यथापुराणं नवभिः प्रकरणैः भारतवर्षस्य विस्तारपूर्वकं चिन्तनं विधाय मदीये हृत्कमले स्थितो भारतीयत्वभावो यथामति यथाशक्ति प्रकटितो वर्तते ।

**१.१ चत्वारो वेदाः ।**

**उपनीतो गुरुकुले वसेन्नित्यं समाहितः ।**
**बिभृयाद्दण्डकौपीनोपवीताजिनमेखलाः ।।**
**पुण्येह्नि गुर्वनुज्ञातः कृतमन्त्राहुतिक्रियः ।**
**स्मृत्वोङ्कारं च गायत्रीमारभेद्वेदमादितः ।।**
**शौचाचारविचारार्थं धर्मशास्त्रमपि द्विजः ।**
**पठेत गुरुतः सम्यक्कर्म तद्दिष्टमाचरेत् ।।**
**ततोभिवाद्य स्थविरान्गुरुं चैव समाश्रयेत् ।**
**स्वाध्यायार्थं तदापन्नः सर्वदा हितमाचरेत् ।।**
**नापक्षिप्तोपि भाषेत नाव्रजेत्ताडितोपि वा ।**
**विद्वेषमथ पैशुन्यं हिंसनं चार्कवीक्षणम् ।।**
**तौर्य्यत्रिकानृतोन्मादपरिवादानलंक्रियाम् ।**
**अञ्जनोद्वर्तनादर्शस्रग्विलेपनयोषितः ।।**
**वृथाटनमसंतोषं ब्रह्मचारी विवर्जयेत् ।**
**ईषच्चलितमध्याह्नेनुज्ञातो गुरुणा स्वयम् ।।**
**अलोलुपश्चरेद्भैक्षं वृत्तिषूत्तमवृत्तिषु ।**
**सद्यो भिक्षान्नमादाय वित्तवत्तुपस्पृशेत् ।।**

**कृतनाध्याह्निकोऽश्नीयादनुज्ञातो यथाविधि ।**

**नाद्यादेककान्नमुच्छिष्टं भुक्त्वा चाचामितामियात् ।।**

**नान्याद्भिक्षितमादद्यादापन्नो द्रविणादिकम् ।**

**अनिन्द्यामन्त्रितः श्राद्धे पैत्रेद्याद् गुरुचोद्यितः ।।**

**एकान्नमप्यविरोधे व्रतानां प्रथमाश्रमी।**

**भुक्त्वा गुरुमुपासीत कृत्वा संधुक्षणादिकम्।।**

**समिधोग्नावादधीत ततः परिचरेद् गुरुम् ।**

**शयीत गुर्व्वनुज्ञातः प्रह्वश्च प्रथमं गुरोः ।।**

**एवमन्वहमभ्यासी ब्रह्मचारी व्रतं चरेत् ।**

**हितोपवादः प्रियवाक्सम्यग्गुर्वर्थसाधकः**[५] **।।**

तत्राधिभौतिकाध्यात्मिकाधिदैविकसकलदुःखापहारकस्य कर्मोपासनाया जीवब्रह्मैक्यज्ञानेनाभ्युदयनिःश्रेयःसिद्धिहेतुकस्य धर्मस्य मूलभूता वेदाः सन्ति, अतो मनुस्मृतिकारः कथयति यद् -

**वेदोखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।**

**आचारश्चैव साधूनामात्मनस्तुष्टिरेव च**[६] **।।**

श्लोकस्यास्य भावो वर्तते, यत्समस्तर्ग्यजुःसामाथर्वलक्षणो विध्यर्थवादमन्त्रस्वरूपो वेदो धर्मे प्रमाणम् । अर्थवादानामपि विध्येकवाक्यत्वेन स्तावकतया धर्मे प्रामाण्यात् ।

**प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते ।**

**एतं विदन्ति वेदेन तस्माद् वेदस्य वेदता**[७] **।।**

---

[5] व्याससमृतिः १।२४-३६

[6] मनुस्मृतिः १।९.

[7] वें. सा. इ. पृष्ठसं. ९

सायणाचार्य्योपि लिखति यत् -

इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः

अनेन प्रकारेण वेदशब्दस्य नैका व्यत्पत्तयो भवन्ति, ता व्युत्पत्तयो वर्तन्ते तद्यथा -

विद - ज्ञाने[८], विद - सत्तायाम्[९] , विद - विचारणे[१०], विद्लृ - लाभे[११], विद - चेतनाख्याननिवासेषु[१२] , एतेषु पञ्चसु पृथक्पृथग्गणीयेषु विदधातुषु विविधा अर्था भवन्ति यथा -

विदन्ति जानन्ति, विद्यन्ते भवन्ति, विन्दते विचारयन्ति, विन्दन्ति लभन्ते सर्वे मनुष्याः सत्यविद्यां यैर्येषु वा तथा च विद्वांसश्च भवन्ति यैः ते चत्वारो वेदाः सन्ति ।

**अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा ।**
**आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः[१३] ।।**

तुदादिगणीयाद् विद्लृ - लाभे[१४] इति धातोः करणेथवा अधिकरणे 'करणाधिकरणयोश्च[१५]' इति पाणिनीयसूत्रेण घञ्प्रत्ययेन

8 अदादिधातुः

9 तुदादिधातुः ११४०

10 दिवादिधातुः

11 तुदादिधातुः ११४०

12 चुरादिधातुः १८४३

13 वा. प. १।१ टीकायाम्

14 तुदादिधातुः ११४०

15 पा. सूत्रम् ३।३।१७

वेदशब्दो निष्पन्नो भवति, यस्यार्थो भवति यद् - विन्दति - विन्दते नाम लभते धर्मादिपुरुषार्थचतुष्टयोपायान् अनेन इति वेदः ।

रुधादिगणीयाद् विद - विचारणे[16] इति धातोः करणेथवा अधिकरणे 'करणाधिकरणयोश्च[17]' इति पाणिनीयसूत्रेण घञ्प्रत्ययेन वेदशब्दो निष्पन्नो भवति, यस्यार्थो भवति यद् - विन्ते - विचारयति सृष्ट्यादिप्रक्रियाम् अनेन इति वेदः ।

चुरादिगणीयाद् विद - चेतनाख्याननिवासेषु[18] इति धातोः करणेथवा अधिकरणे 'करणाधिकरणयोश्च[19]' इति पाणिनीयसूत्रेण घञ्प्रत्ययेन वेदशब्दो निष्पन्नो भवति, यस्यार्थो भवति यद् - इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः ।

अनेन प्रकारेण मम शोधमहानिबन्धस्य प्रथमप्रकरणस्य 'चत्वारो वेदाः' इति नामकं प्रथमोपप्रकरणं समाप्नोमि ।

## १.२ वेदानामुपादेयता ।

**ॐव्वेदोसिषेनत्वन्देवव्वेददेवेब्भ्योव्वेदोभवस्तेनमह्यं व्वेदोभूयाꣳ[20]।।**

**ॐपावकानꣳसरस्वतीव्वाजेभिर्व्वाजिनीवती ।**
**यज्ञं व्वष्टुधियावसुꣳ[21] ।।**

---

16 रुधादिधातुः ११४०

17 पा. सूत्रम् ३।३।१७

18 चुरादिधातुः १८४३

19 पा. सूत्रम् ३।३।१७

20 शु. यजु. २१।२

21 शु. यजु. २०।८४

**यत्र यत्र स्वभावेन कृष्णसारः सदा मृगः ।**
**चरते तत्र वेदोक्तो धर्मो भवितुमर्हति ।।**
**श्रुतिस्मृतिपुराणानां विरोधो यत्र दृश्यते ।**
**तत्र श्रौतं प्रमाणं तु तयोर्द्वैधे स्मृतिर्वरा[२२] ।।**

महर्षिदेवव्यासोपि व्यासस्मृतौ कथयति यद् - यस्मिन् देशे स्वभावेन कृष्णो मृगः सदा विचरति, तस्मिन्देशे द्विजैर्नाम ब्राह्मणक्षत्रियवैश्यैर्वेदोक्तं धर्मसाधनं कर्तव्यम् , तथा च यत्र श्रुतीनां, स्मृतीनां, पुराणानां च विरोधोवलोक्यते, तत्र श्रौतं धर्मसाधनं कर्तव्यम् , एवं यत्र स्मृतीनां पुराणानां च विरोधो वर्तते, तत्र स्मार्तं धर्मसाधनं कर्तव्यम् , स एव देशो धर्मानुष्ठानाय योग्यो वर्तते,

**न चागमादृते धर्मस्तर्केण व्यवतिष्ठते ।**
**ऋषीणामपि यज्ज्ञानं तदप्यागमपूर्वकम्[२३] ।।**

अस्याः कारिकाया अर्थो भवति यद् आगमादृते आगमं विना, धर्मः पुण्यं पापञ्च, धर्मपदं पापस्याप्युपलक्षणम् । तर्केण आगममूलेन केवलेन शुष्कतर्केण, न व्यवतिष्ठते न निश्चीयते । आगममूलकस्तु तर्को धर्म व्यवस्थापयितुमर्हति । तदुक्तम् -

**आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना ।**
**यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः[२४] ।।**

येष्वार्षज्ञानवत्स्वलौकिकाचारसिद्धान्तवत्सु कपिलादिषु सूक्ष्मादिविषयात् सर्वपुरुषातिशायि तर्कातीतं सर्वपदार्थदर्शित्वं श्रूयते,

---

22 व्यासस्मृतिः १।३-४

23 वाक्यपदीयम् १।३०

24 वाक्यपदीयम् १।३० टीकायाम्

तेषामपि कपिलादीनामृषीणां तदार्षं ज्ञानम् । आर्षत्वं च वेदप्रभवत्वाद्, ऋषिर्हि वेदोत्र, आगमिकेनैवाागमविहितकर्मजन्येनैव धर्मेण संस्कृतचेतसामाविर्भवति इत्याख्यायते, कथं यद् - अस्माकं भारतदेशोनेकैः गुणैर्भूषितो वर्तते, वेदादन्येषां वेदमूलकत्वेन प्रामाण्येढ भिहितेपि मनुर्मनुस्मतेः सर्व्वोत्कर्षज्ञानाय विशेषेण वेदानामुपादेयतां कथयति यथा -

**यः कश्चित्कस्यचिद्धर्म्मो मनुना परिकीर्तितः ।**
**स सर्व्वोभिहितो वेदे सर्वज्ञानमयो हि सः[२५] ।।**

यः कश्चित्कस्यचिद् ब्राह्मणैर्मनुना धर्म्मः कथितः, स सर्व्वेषु वेदेषु प्रतिपादितो वर्तते, यस्मात्सर्व्वगुणसम्पन्नो मनुस्मृतिकारो मनुः सर्व्वज्ञतया च उत्सन्नविप्रकीर्णपठ्यमानवेदानामर्थं सम्यग्ज्ञात्वा लोकानां हितायोपनिबद्धवान् अतः कथयति यद् -

**सर्वं तु समवेक्ष्येदं निखिलं ज्ञानचक्षुषा ।**
**श्रुतिप्रामाण्यतो विद्वान्स्वधर्मे निविशेत वै[२६] ।।**

सर्व्वं शास्त्रजातं वेदार्थावगमोचितं ज्ञानं मीमांसाव्याकरणज्ञानमेव चक्षुर्यस्य स इति तेन ज्ञानचक्षुषा निखिलं तद्विशेषेण पर्य्यालोच्य वेदप्रामाण्येन अनुष्ठेमवगम्य स्वधर्म्मेवतिष्ठेत, अर्थाद् - एते सर्व्वे ब्राह्मणादयो यथाकालं यो यस्यानुकल्पितोपि उपनयनकाले कथितः, षोडशादिवर्षपर्य्यन्तं तत्रासंस्कृतातदूर्ध्वं सावित्रीपतिता उपनयनहीनाः शिष्टगर्हिता व्रात्यसंज्ञा भवन्ति, वेदविद्भिर्विद्वद्भिः सद्भिर्धार्म्मिकै रागद्वेषशून्यैरनुष्ठितो हृदयेन नाम

---

25 मनुस्मृतिः २।७

26 मनुस्मृतिः २।८

आभिमुख्येन ज्ञात एव धर्म्म एव वेदानामुपादेयता वर्तते, अत्र मनुस्मृतिटीकाकारष्टीकायां लिखति यद् -

**वेदविद्भिर्ज्ञात इति प्रयुञ्जानो विशेषणम् ।**
**वेदादेव परिज्ञातो धर्म्म इत्युक्तवान्मनुः ।।**
**हृदयेनाभिमुख्येन ज्ञात इत्यपि निर्दिशन् ।**
**श्रेयःसाधनमित्याह तत्र ह्यभिमुखं जनः ।।**
**वेदप्रमाणकः श्रेयःसाधनं धर्म्म इत्यतः ।**
**मनूक्तमेव मुनयः प्रणिन्युर्धर्मलक्षणम्[२७] ।।**

एतस्मात्कारणाद् वेदप्रमाणकः श्रेयःसाधनं धर्म्म इत्युक्तमस्ति, एवंविधो धर्म्मो वर्तते, इदमेव धर्म्मस्य सामान्यलक्षणं हृदि निधाय महर्षिः हारीतो हारीतस्कृतौ लिखति यद् -

**धर्मः श्रेयः समुद्दिष्टं श्रेयोभ्युदयलक्षणम् ।**
**स तु पञ्चविधः प्रोक्तो वेदमूलः सनातनः ।।**
**अस्य सम्यगनुष्ठानात्स्वर्गो मोक्षश्च जायते ।**
**इह लोके सुखैश्वर्यमतुलं च खगाधिप[२८] ।।**

स्मृत्यादयोपि वेदमूलकत्वेनैवेति कथयन्ति, हृदयेनाभ्यनुज्ञातः इत्यस्याथो भवति यद् - अन्तःकरणविचिकित्साशून्य इति, अथवा हृदयं वेदः, स ह्यधीतो भावनारूपेण हृदयस्थितो हृदयमित्युच्यते, अनेन प्रकारेण 'वेदानामुपादेयता' इति विषयं समाप्नोमि ।

## १.३ षड्दर्शनानां परिचयः ।

27 मनुस्मृतिः-टीकायाम् २।१

28 मनुस्मृतिः-टीकायाम् २।१

वेदानामर्थावबोधाय, सुरक्षणाय, उच्चारणविधिज्ञानाय, च षड् दर्शनानि तत्तदृषिभिर्महर्षिभिर्विरचितानि सन्ति, तेषां षण्णां दर्शनानां परिचयो विलिख्यते तद्यथा –

**१.३.१ दर्शनशब्दस्य निर्वचनम् ।**

दृश्यते ज्ञायते परमं तत्त्वमनेनेति दर्शनम् , दृश्यन्ते वेदा येन तदिति दर्शनम् , दृश्यन्ते वेदा यस्मिन् तदिति दर्शनम्, अत्र ''दृशिर्–प्रेक्षणे[२९]'' इत्यस्माद् धातोः ''करणाधिकरणयोश्च[३०]'' इत्यनेन करणेधिकरणे च ल्युट् प्रत्ययेनुबन्धलोपे ''पुगन्तलघूपधस्य च[३१]'' इत्यनेन उपधागुणे ''उरण्रपरः[३२]'' इत्यनेन रपरत्वे ''युवोरनाकौ[३३]'' इत्यनेन ''यु'' इत्यस्य स्थाने अनादेशे, णत्वे, स्वादिकार्य्ये सति दर्शनशब्दो निष्पन्नो भवति, दर्शनन्नाम ( Philosophy ) सदसज्ज्ञानसोपानम् , अथवा दर्शनन्नाम ज्ञानम्प्रति प्रेमभावः, अतो दार्शनिका नाम ज्ञानप्रेमिणः, इत्थं दर्शनशब्दस्य निर्वचनम्भवति ।

**१.३.२ दर्शनशास्त्रस्य प्रादुर्भावः ।**

सर्व्वेषु ग्रन्थेषु प्राचीनतमा वेदास्सन्ति, तेषां सर्व्वेषां वेदानामर्थावबोधाय, सुरक्षणाय, उच्चारणविधिज्ञानाय, च षड् दर्शनानि तत्तदृषिभिर्महर्षिभिर्निर्मितानि सन्ति, वेदवाङ्मयान्तर्गतत्वेन

---

29 भ्वादिधातुः ७८८

30 पा.सू. ३।३।११७

31 पा.सू. ७।३।८६

32 पा.सू. १।१।५१

33 पा.सू. ७।१।१

ब्राह्मणग्रन्थाः, आरण्यकग्रन्थाः, उपनिषद्ग्रन्थाश्च सन्ति, तदनन्तरं सूत्रसाहित्यं स्मृतिसाहित्यं च वर्तते, वास्तविकदृष्ट्या दर्शनग्रन्थाः सूत्रसाहित्ययुग एव रचितानि सन्तीति ज्ञातुं शक्यते, महभारतयुगे वेदान्तमीमांसादर्शनयोः प्रादुर्भावः संजातः, अतस्ततः पूर्वमेव दर्शनशास्त्राण्यासन् , वस्तुतो दर्शनग्रन्थानां प्रतिपाद्या अनेके विषया वेदेषु , उपनिषत्सु , पुराणेषु, वेदाङ्गेषु च समुपलभ्यन्ते, एतस्मादेव कारणाद् दर्शनग्रन्थानां प्रादुभावः समयो वा यदि वा सन्दिहानस्तथापि दार्शनिकचिन्तधारा वैदिकचिन्ताधारा सर्वप्राचीनतमेति वक्तुं शक्यते ।

**१.३.३ दर्शनशास्त्रस्य भेदाः ।**

भारतीयदर्शनसाहित्यं द्विविधं विभक्तमस्ति, तयोर्नामानेन प्रकारेण वर्तते, तद्यथा –

**१. आस्तिकदर्शनम् ।**

**२. नास्तिकदर्शनम् ।**

आस्तिकन्नाम अस्ति पारलौकिकविषयिणी मतिर्यस्य सः, नास्तिकन्नाम नास्ति पारलौकिकविषयिणी मतिर्यस्य सः । तत्र आस्तिकदर्शनानि वेदसमर्थकानि सन्ति, तान्यास्तिकदर्शनानि ईश्वरस्य सत्तामङ्गीकुर्व्वन्तीति हेतोः सेश्वरवादिनः कथ्यन्ते, इत्थं वेदानामर्थमवबोधयितुं महर्षिभिः षड् आस्तिकदर्शनानि विरचितानि सन्ति, तेषां षण्णां नामान्यनेन प्रकारेण सन्ति तद्यथा –

१. सांख्यदर्शनम् ।

२. योगदर्शनम् ।

३. न्यायदर्शनम् ।

४. वैशेषिकदर्शनम् ।

५. वेदान्तदर्शनम् ।

६. उत्तरमीमांसादर्शनम् ।

नास्तिकन्नाम नास्ति पारलौकिकविषयिणी मतिर्यस्य सः । तत्र नास्तिका नाम वेदनिन्दका भवन्ति, तेषां त्रयाणां नास्तिकदर्शनानां नामान्यनेन प्रकारेण सन्ति तद्यथा –

१. चार्वाकदर्शनम् ।

२. जैनदर्शनम् ।

३. बौद्धदर्शनम् ।

एतानि नास्तिकदर्शनानि वेदप्रामाण्यं न स्वीकुर्व्वन्ति, सम्प्रति दर्शनग्रन्थानां परिचयो वर्तते तद्यथा –

१.३.३.१. सांख्यदर्शनम् ।

सर्व्वेषां वेदानामर्थावबोधाय, संरक्षणाय, उच्चारणविधिज्ञानाय, च षड् दर्शनानि तत्तदृषिभिर्महर्षिभिर्विरचितानि सन्ति, तेषु षट्सु दर्शनेषु सांख्यदर्शनमस्ति, तस्य संक्षेपेण परिचयो विलिख्यते तद्यथा –

१.३.३.१.१ सांख्यशब्दस्य निर्वचनम् ।

सांख्यान्नाम संख्यायन्ते गण्यन्ते येनेति सांख्यम् , अथवा संख्यायते प्रकृतिपुरुषान्यथाख्यातिरूपोवबोधः सम्यग्ज्ञायते येन तदिति सांख्यम् , अत्र समुपसर्गात् ‘‘ख्या–प्रकथने[३४]’’ इत्यस्माद् धातोः ‘‘आतश्चोपसर्गे[३५]’’ इत्यनेन अङ् प्रत्यये अनुबन्धलोपे ‘‘आतो लोप

[34] अदादिधातुः १०६९

[35] पा.सू. ३।३।१०६

इटि च[३६]'' इत्यनेन आकारस्य लोपे, प्रातिपदिकत्वात् सुप्रत्यये, स्त्रीत्वविवक्षायां ''अजाद्यष्टाप्[३७]'' इत्यनेन टाप्प्रत्ययेनुबन्धलोपे संख्याशब्दो निष्पद्यते, तदनन्तरं संख्याया इदमिति सांख्यम् , अत्र ''तस्येदम्[३८]'' इत्यनेन अण्प्रत्ययेनुबन्धलोपे, णित्त्वात् , ''तद्धितेष्वचामादेः[३९]'' इत्यनेन आदिवृद्धौ, स्वादिकार्य्ये सति सांख्यशब्दो निष्पन्नो भवति, अथवा समुपसर्गात् ''चक्षिङ्-व्यक्तायां वाचि[४०]'' इत्यस्माद् धातोः ''आतश्चोपसर्गे[४१]'' इत्यनेन अङ् प्रत्यये अनुबन्धलोपे, ''चक्षिङः ख्याञ्[४२]'' इत्यनेन ख्यादेशे ''आतो लोप इटि च[४३]'' इत्यनेन आकारस्य लोपे, प्रातिपदिकत्वात् सुप्रत्यये, स्त्रीत्वविवक्षायां ''अजाद्यष्टाप्[४४]'' इत्यनेन टाप्प्रत्ययेनुबन्धलोपे संख्याशब्दो निष्पद्यते, तदनन्तरं संख्याया इदमिति सांख्यम् , अत्र ''तस्येदम्[४५]'' इत्यनेन अण्प्रत्ययेनुबन्धलोपे, णित्त्वात् , ''तद्धितेष्वचामादेः[४६]'' इत्यनेन आदिवृद्धौ, स्वादिकार्य्ये सति सांख्यशब्दो निष्पन्नो भवति । संख्याया वर्ण्णनं यत्र क्रियते

---

36 पा.सू. ६।४।६४

37 पा.सू. ४।१।४

38 पा.सू. ७।३।१२०

39 पा.सू. ७।२।११७

40 अदादिधातुः १०८७

41 पा.सू. ३।३।१०६

42 पा.सू. २।४।५४

43 पा.सू. ६।४।६४

44 पा.सू. ४।१।४

45 पा.सू. ७।३।१२०

46 पा.सू. ७।२।११७

तत्सांख्यम् , संख्या चर्चा विचारणा[४७] , महाभारतकारो लिखति यद् –

**संख्यां प्रकुर्वते चैव प्रकृतिश्च प्रचक्षते ।**
**तत्त्वानां चतुर्विंशतिस्तेन सांख्याः प्रकीर्तिताः[४८] ।।**

अस्य सांख्यदर्शनस्याद्यः प्रवर्तको देवहूतिकर्दमयोः पुत्रो महर्षिकपिलो वर्तते, अयमेव महर्षिकपिलो भगवतः पञ्चमावतारोस्ति, विषयमिमग्रे प्रतिपादयिष्यामि, अतः सांख्यदर्शनपरिचयनामकं विषयं समाप्नोमि ।

१.३.३.२. योगदर्शनम् ।

योगमार्गात्परो मार्गो नास्ति नास्ति श्रुतौ स्मृतौ ।
शास्त्रेष्वन्येषु सर्वेषु शिवेन कथितः पुरा[४९] ।।
यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते ।
एकं सांख्यं च योगं च यः पश्यति स पश्यति[५०] ।।

आस्तिकदर्शनेषु योगदर्शनस्यानन्यतमं स्थानं वर्तते, सांख्यदर्शनेन सह योगदर्शनस्यापि विशेषरूपेण सामञ्जस्यमस्ति, सांख्यदर्शनानुसारमेव योगदर्शनस्यापि मते तत्त्वज्ञानात्केवलोपलब्धिर्भवति।

१.३.३.२.१ योगशब्दस्य निर्वचनम् ।

---

47 अमरकोशः १।५।२

48 महाभारत-शान्तिपर्व ३०६।४३

49 सं. वा. प्रवेशिका-पृ. सं. ३८

50 श्री. गीता ५।५

युज्यते नाम समाधीयतेनेन इति योगः, योजनमिति योगः, अत्र ''युज-समाधौ[५१]'' अथवा ''युजिर्-योगे[५२]'' ''युज-संयमने[५३]'' इत्येभ्यः त्रिभ्यो धातुभ्यः ''हलश्च[५४]'' इत्यनेन घञ्प्रत्यये अनुबन्धलोपे ''चजोः कुः घिण्यतोः[५५]'' इत्यनेन जकारस्य स्थाने कुत्वेन घकारे, स्वादिकार्य्ये सति योगशब्दो निष्पन्नो भवति, अस्य योगशब्दस्य नैकेढ र्था विविधेषु शास्त्रेषु तत्तच्छास्त्रकारैः स्वशास्त्रेषु कृताः सन्ति तद्यथा - **योगः**

**संनहन(कवचम्)उपाय(सामादिः)ध्यानसंगतियुक्तिषु[५६] ।।**

**यस्मादृते न सिद्ध्यति यज्ञो विपश्चितश्चन ।**
**स धीनां योगमिन्वति[५७] ।।**

**प्रत्याहारस्तथा ध्यानं प्राणायामोथ धारणा ।**
**तर्कश्चैव समाधिश्च षडङ्गो योग उच्यते[५८] ।।**

**यत्तु चित्तस्य सततमर्थे श्रेयसि बन्धनम् ।**
**ज्ञानयोगः स विज्ञेयः सर्वसिद्धिकरः शिवः[५९] ।।**

**योगास्त्रयो मया प्रोक्ता नृणां श्रेयो विधित्सया ।**

---

51 दिवादिधातुः ११९७

52 रुधादिधातुः १५४८

53 चुरादिधातुः १६८१

54 पा.सू. ३।३।१०६

55 पा.सू. ७।३।५२

56 अमरकोशः ३।३।२२

57 ऋग्वेदः १।१८।७

58 सं. वा. प्रवेशिका-पृ. सं. ३८

59 सं. वा. प्रवेशिका-पृ. सं. ३८

**ज्ञानं कर्म च भक्तिश्च नोपायोन्योस्ति कुत्रचित्[६०] ।।**
**मन्त्रो लयो हठो राजयोगान्ता भूमिकाः क्रमात् ।**
**एक एव चतुर्धायं महायोगोभिधीयते[६१] ।।**
**इज्याचारदमाहिंसादानस्वाध्यायकर्मणाम् ।**
**अयं तु परमो धर्मो यद्योगेनात्मदर्शनम्[६२] ।।**

अनेन प्रकारेण योगशब्दस्य नैकेर्थाः कथिताः सन्ति, अस्य योगदर्शनस्य प्रवर्तको हिरण्यगर्भो वर्तते, भगवान् पतञ्जलिस्तु तस्यानुशासनमेव कृतवान् । योगदर्शनस्य मूलभूतो ग्रन्थो योगसूत्रमस्ति, अस्य प्रवर्तको व्याकरणभाष्यस्य रचयिता, चरकसंहितायाः कर्ता पतञ्जलिरेव वर्तते, अस्मिन् योगसूत्रे चत्वारः पादाः सन्ति, तद्यथा –

१. समाधिपादः ।
२. साधनपादः ।
३. विभूतिपादः ।
४. कैवल्यपादः ।

मुख्यतयैतेषां चतुर्ण्णां विवेचनमस्ति, अन्ते च निम्नलिखितेन श्लोकेन विषयमिमं समाप्नोमि यथा –

**योगेन चित्तस्य पदेन वाचां मलं शरीरस्य च वैद्यकेन ।**
**योपाकरोत्तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोस्मि[६३] ।।**

---

60 री. भा. ११।२०।६

61 सं. वा. प्रवेशिका–पृ. सं. ३८

62 याज्ञवक्यशिक्षा १।१।८

63 याज्ञवक्यशिक्षा १।१।८

१.३.३.३. न्यायदर्शनम् ।

**निःश्रेयसाधिगतिरत्र तु षोडशानां**
**ज्ञानात्प्रमाणमिह वेत्ति चतुष्टयं यः ।**
**ईशो जगत्सृजति यस्य मते स्वतन्त्रो**
**न्यायप्रवर्तकमहामुनये नमोस्मै[६४] ।।**

षट्स्वास्तिकदर्शनेषु न्यायदर्शनस्यानन्यतमं स्थानं वर्तते, अतो न्यायदर्शनस्यापि संक्षेपेण परिचयः प्रस्तूयते तद्यथा –

१.३.३.३.१ न्यायशब्दस्य निर्वचनम् ।

नियमेन ईयते इति न्यायः, अत्र ''इण्–गतौ[६५]'' इति धातोः ''परिन्योर्नीणोर्द्यूताभ्रेषयोः[६६]'' इत्यनेन घञ्प्रत्यये अनुबन्धलोपे ''अचो ञ्णिति[६७]'' इत्यनेन धातोरिकारस्य स्थाने ऐकारे, आयादेशे, स्वादिकार्य्ये सति न्यायशब्दो निष्पन्नो भवति, अस्य न्यायशब्दस्य नैकेर्था विविधेषु शास्त्रेषु तत्तच्छास्त्रकारैः स्वशास्त्रेषु कृताः सन्ति तद्यथा –

**प्रमाणैरर्थपरीक्षणं न्यायः ।**
**अभ्रेषन्यायकल्पास्तु देशरूपं समञ्जसम् ।**
**युक्तमौपायिकं लभ्यं भजमानाभिनीतवान्[६८] ।।**

64 सं. वा. प्रवेशिका–पृ. सं. ४३

65 अदादिधातुः ११९७

66 पा.सू. ३।३।३७

67 पा.सू. ७।२।११५

68 अमरकोशः २।८।२४

**नानुपलब्धेर्थे न निर्णीतेर्थे न्यायः प्रवर्तते, किं तर्हि ? संशयितेर्थे**[६९] **।।**

अनेन प्रकारेण न्यायशब्दस्य नैकेर्थाः कथिताः सन्ति, अस्य न्यायदर्शनस्य प्रवर्तको महर्षिर्गौतमो वर्तते, अस्मिन् सम्पूर्णे संस्कृतसाहित्ये गौतमनामधारिणो नैके महर्षयः संजाताः सन्ति, तद्यथा –

१. छान्दोग्योपनिषदि जाबालिपुत्रो गौतमः ।

२. वायुपुराणाधारेण श्वेतवराहकल्पे कश्चन ब्राह्मणो गौतमः।

३. भरद्वाजमुनेरपरं नाम गौतमः ।

४. बौद्धधर्मप्रवर्तकस्य बुद्धस्य पूर्वं नाम गौतमः ।

५. स्मृतिप्रणेता गौतमः ।

६. हरिवंशपुराणाधारेण सप्तर्षिष्वको गौतमः ।

७. रामायणप्रसिद्धोहल्यास्वामी गौतमः ।

८. व्यासदेवगुरुर्गौतमः ।

एतेष्वहल्यायाः स्वामी गौतम एव न्यायदर्शनस्य प्रवर्तको वर्तते, इति नैकेषां विदुषां मतमिदमस्ति ।

१.३.३.३.२ न्यायदर्शनस्य विविधानि नामानि ।

अस्य न्यायदर्शनस्य नैकानि नामानि व्यवहृतानि सन्ति, तेषां नामान्यनेन प्रकारेण सन्ति तद्यथा –

१. हेतुशास्त्रम् ।

---

69 न्यायभाष्यम् १।१।१

२. तर्कशास्त्रम् ।

३. आन्वीक्षिकी विद्या ।

४. तर्कविद्या ।

५. वादशास्त्रम् ।

६. प्रमाणशास्त्रम् ।

७. हेतुविद्या ।

८. मननशास्त्रम्।

९. अक्षपाददर्शनम् ।

अस्य न्यायदर्शनस्य द्विविधो विभागो वर्तते, तयोर्नामानेन प्रकारेण वर्तते तद्यथा ।

१. नव्यन्यायः (गौतमप्रवर्तितः) ।

२. नव्यन्यायः (गङ्गेशोपाध्यायप्रवर्तितः) ।

प्रथमप्रणाल्यां पदार्थमीमांसा, द्वितीयप्रणाल्यां च प्रमाणमीमांसा बुद्धिविचारश्च विशेषरूपेण क्रियते, इत्थं न्यायदर्शनस्य परिचयं प्रदाय विषयमिमं समाप्नोमि ।

१.३.३.४. वैशेषिकदर्शनम् ।

दित्वे पाकजोत्पत्तौ विभागे च विभागजे ।
यस्य न स्खलिता बुद्धिस्तं वै वैशेषिकं विदुः[७०] ।।

आस्तिकदर्शनेषु वैशेषिकदर्शनस्यानन्यतमं स्थानं वर्तते, अतो वैशेषिकदर्शनस्यापि संक्षेपेण परिचयः प्रस्तूयते तद्यथा –

---

[70] सं. वा. प्रवेशिका–पृ. सं. ५१

१.३.३.४.१ वैशेषिकशब्दस्य निर्वचनम् ।

विशिष्यते सर्व्वतो व्यवच्छिद्यते येन सः इति विशेषः, विशेषाभ्यां व्यवच्छेदकाभ्यां साधर्म्यवैधर्म्याभ्यां प्रभवतीति वैशेषिकम् , विशेषाभ्यां व्यवच्छेदकाभ्यां व्यवहरतीति वैशेषिकम् , अत्र विशेषशब्दो व्यवच्छेदकार्थः, अत्र विशेषे भवमिति वैशेषिकम् , अत्र ''तत्र भवः[७१]'' इत्यनेन ठक्प्रत्ययेनुबन्धलोपे, णित्त्वात् , ''किति च[७२]'' इत्यनेन आदिवृद्धौ, स्वादिकार्य्ये सति वैशेषिकशब्दो निष्पन्नो भवति । अस्य वैशेषिकशब्दस्य नैकेर्था विविधेषु शास्त्रेषु तत्तच्छास्त्रकारैः स्वशास्त्रेषु कृताः सन्ति तद्यथा - कणादो विशिष्टोपदेष्टा, दर्शनमिदं च न्यायसांख्यादिदर्शनतुलनया द्रव्यादिपदार्थानां प्रतिपादने विशिष्टमिति हेतोः वैशेषिकमिति नाम आप्तवान् , तथा च पदार्थेषु पञ्चमपदार्थस्य विशेषस्य अतिरिक्ततया कथनाद् वैशेषिकमिति नाम वर्तते ।

१.३.३.४.२ वैशेषिकदर्शनस्य प्रवर्तकः ।

अस्य वैशेषिकदर्शनस्य प्रवर्तको महर्षिकणादो वर्तते, अतोस्य वैशेषिकदर्शनस्यापरन्नाम काणाददर्शनमिति कथ्यते, अस्य वैशेषिकदर्शनस्यापरन्नाम औलूक्यदर्शनमपि वर्तते, कथं यद् - महर्षिकणाद उलूकर्षेः पुत्र इति हेतोरौलूक्यदर्शनं वर्तते । अनेन प्रकारेण षट्स्वास्तिकदर्शनेषु वैशेषिकदर्शनमिदं विशेषं महत्त्वमादधाति, अन्ते च निम्नलिखितेन श्लोकेन वैशेषिकदर्शननामकं विषयमिमं समाप्नोमि यथा-

71 पा.सू. ४।३।५३

72 पा.सू. ७।२।११८

**भावाष्षडेव मुनिना विहितास्तदन्ते**

**चान्योप्यभाव इति सप्तपदार्थशास्त्रम् ।**

**सामान्यवर्ण्णनपरोपि विशेषरूपोसौ**

**नित्यमेव जयति प्रथितः कणादः[७३] ।।**

१.३.३.५. पूर्वमीमांसादर्शनम्।

नैयायिका वा ननु शाब्दिका वा त्रयी शिरस्सु श्रमशालिनो वा ।

वादावहे बिभ्रति जैमिनीयन्यायोपरोधे सति मौनमुद्राम्[७४]।।

षट्स्वास्तिकदर्शनेषु मीमांसादर्शनस्यानन्यतमं स्थानं वर्तते, अतो मीमांसादर्शनस्यापि संक्षेपेण परिचयः प्रस्तूयते तद्यथा –

१.३.३.५.१ मीमांसाशब्दस्य निर्वचनम् ।

मीमांसाशब्दस्य निर्वचनं भवति यद् – ''मान-पूजायाम्[७५]'' इति धातोः ''मानेर्जिज्ञासायाम्[७६]'' इति वार्तिकसहकारेण ''मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य[७७]'' इत्यनेन सन्प्रत्ययेनुबन्धलोपे, द्वित्वादिकार्य्ये, मीमांसशब्दात् ''अ प्रत्ययात्[७८]'' इत्यनेन अप्रत्यये, प्रातिपदिकत्वात्स्वादिकार्य्ये सति मीमांसाशब्दो निष्पन्नो भवति, अस्य मीमांसाशब्दस्य नैकेर्था विविधेषु शास्त्रेषु तत्तच्छास्त्रकारैः स्वशास्त्रेषु कृताः सन्ति तद्यथा – विचारणा, जिज्ञासा,

---

73 सं. वा. प्रवेशिका-पृ. सं. ५५

74 सं. वा. प्रवेशिका-पृ. सं. ५१

75 भ्वादिधातुः १०४१

76 वार्तिकम् ५५०

77 पा.सू. ३।१।६

78 पा.सू. ३।३।१०२

अतो यस्मिन्धर्म्मस्य वेदार्थस्य च विचारणा मीमांसा वा क्रियते, तन्मीमांसाशास्त्रमिति । अतो मीमांसादर्शनस्य विषये लिखितमस्ति यद् –

**धर्मे प्रमीयमाणो हि वेदेन करणात्मना ।**
**इति कर्तव्यताभागं मीमांसा पूरयिष्यति[७९] ।।**

अस्य मीमांसादर्शनस्य द्विविधो विभागो वर्तते, तयोर्नाम वर्तते तद्यथा –

१. पूर्वमीमांसादर्शनम्।
२. उत्तरमीमांसादर्शनम् ।

अस्य मीमांसादर्शनस्य प्रणेता महर्षिर्जैमिनिर्वर्तते, स एव व्यासदेवस्य शिष्यो महर्षिर्जैमिनिर्व्यासदेवान्महाभारतं सामवेदं च पठितवान् , स एव व्यासदेवस्य शिष्यो महर्षिर्जैमिनिः पूर्वमीमांसादर्शनस्य प्रणेतेत्यनुमीयते, तत्र मुख्यतयैते विषया विवेचिताः सन्ति यथा –

१. धर्मजिज्ञासा।
२. कर्मभेदः ।
३. शेषत्वम् ।
४. प्रयोज्यप्रयोजकभावः ।
५. कर्मसु क्रमः।
६. अधिकारः ।
७. सामान्यातिदेशः ।

79 सं. वा. प्रवेशिका–पृ. सं. ५६

८. विशेषातिदेशः ।

९. ऊहः ।

१०. बाधः ।

११. तन्त्रम् ।

१२. अवापः ।

अन्ते च निम्नलिखितेन श्लोकेन मीमांसादर्शननामकं विषयमिमं समाप्नोमि यथा -

**वेदोक्तकर्मसरणिः स तु यागरूपो**
**विध्यर्थवादयुगलं परिलम्बमानः ।**
**धर्मो भवेत्किल ततो जननान्तरेषु**
**कर्मैव सर्वमिति जैमिनये नमोस्तु**[80] **।।**

१.३.३.६. (वेदान्तः) उत्तरमीमांसादर्शनम् ।

वेदानामन्तो यस्मिन् स इति वेदान्तः, अत्रान्तशब्दस्यार्थो निश्चयः, निर्णयो वर्तते, अतो वेदान्तः तादृशी विद्या अस्ति, यया वेदस्यान्तिमध्येयस्य ज्ञानं लब्धुं शक्यते, यथा - वेदा ब्रह्मात्मविषयाः। कदाचिद्वेदानां सारभूतोर्थो लक्ष्यभूतोर्थो वा वेदान्तः, इति समेषां विदुषामभिप्रायो वर्तते, अतो मीमांसादर्शनस्य पूर्वभागो नाम पूर्वमीमांसा नाम कर्ममीमांसेति कथ्यते, एवं मीमांसादर्शनस्य उत्तरभागो नाम उत्तरमीमांसा (वेदान्तः) नाम कर्ममीमांसेति कथ्यते । ब्रह्ममीमांसा वा शारीरिकमीमांसेति नाम्ना कथ्यते, अतो वेदान्तो नाम जीवब्रह्माभेदबोधकं वाक्यमिति, रहस्यविद्येति, उपनिषदिति,

[80] सं. वा. प्रवेशिका-पृ. सं. ५५

ब्रह्मविद्याप्रतिपादकं शास्त्रमिति, मोक्षशास्त्रमिति विद्वांसः कथयन्ति, अस्य शास्त्रस्य प्रवक्ता वेदव्यासो वर्तते, वेदान्तदर्शनस्य मूलं भगवद्बादरायणेन विरचितं ब्रह्मसूत्रमस्ति, इदमेव वेदान्तदर्शनमुररीकृत्य विविधाः सम्प्रदायाः संजाताः सन्ति, तेषां सम्प्रदायानां नामानि, तत्प्रवक्तॄणां नामानि, प्रधानग्रन्थानां च नामानि सन्ति तद्यथा –

| क्रमः | वादः | प्रवक्ता | प्रधानग्रन्थः |
|---|---|---|---|
| १. | अद्वैतवादः | श्रीशङ्कराचार्य्यः | शाङ्करभाष्यम् |
| २. | विशिष्टाद्वैतवादः | श्रीरामानुजार्य्यः | श्रीभाष्यम् |
| ३. | शुद्धाद्वैतवादाः | श्रीवल्लभाचार्य्यः | ब्रह्मसूत्राणुभाष्यम् |
| ४. | द्वैतवादः | श्रीमध्वाचार्य्यः | ब्रह्मसूत्रभाष्यम् |
| ५. | द्वैताद्वैतवादः | श्रीनिम्बर्काचार्य्यः | वेदान्तपारिजातसौरभम् |
| ६. | अचिन्त्यभेदाभेदः | श्रीचैतन्यमहाप्रभुः | शिक्षाष्टकम् |

अन्ते च निम्नलिखितेन श्लोकेन उत्तरमीमांसादर्शननामकं विषयमिमं समाप्नोमि यथा –

**यो विद्याच्चतुरो वेदान्साङ्गोपनिषदो द्विजः ।**
**न चाख्यातमिदं विद्वानेव स स्याद्विचक्षणः ।।**
**अर्थशास्त्रमिदं प्रोक्तं धर्मशास्त्रमिदं महत् ।**
**कामशास्त्रमिदं प्रोक्तं व्यासेनामितबुद्धिना[८१] ।।**

१.३.३.७. चार्वाकदर्शनम् ।

81 सं. वा. प्रवेशिका–पृ. सं. ८६

**कच्चिन्न लोकायतिकान्ब्राह्मणांस्तात सेवसे ।**
**अनर्थकुशला ह्येते बालाः पण्डितमानिनः ।।**
**धर्मशास्त्रेषु मुख्येषु विद्यमानेषु दुर्बुधाः ।**
**बुद्धिमान्वीक्षिकीम्प्राप्य निरर्थं प्रवदन्ति ते[८२]।।**

नास्तिकदर्शनेषु चार्वाकदर्शनस्यानन्यतमं स्थानं वर्तते, अतः चार्वाकदर्शनस्यापि संक्षेपेण परिचयः प्रस्तूयते तद्यथा –

१.३.३.७.१ चार्वाकशब्दस्य निर्वचनम् ।

चार्वी नाम श्रवणमात्रेण मनोहारिणी वाग्वचनं यस्य तदिति चार्वाकदर्शनम् । षड्दर्शनस्य टीकाकारो गुणरत्नः चार्वाकपदस्य निर्वचनं कुर्व्वन् कथयति यत् – ''चर्व-अदने[८३]'' चर्वन्ति भक्षयन्ति नाम तत्त्वतो न मन्यन्ते पुण्यपापादिकं परोक्षजातमिति चार्वाकाः । अस्य चार्वाकदर्शनस्य नैकानि नामानि सन्ति तद्यथा –

१. लोकायतदर्शनम् ।
२. लोकायतिकदर्शनम् ।
३. पाषाण्डदर्शनम् ।
४. बाह्यदर्शनम् ।
५. देहात्मवादः ।

१.३.३.७.२ चार्वाकदर्शनस्य प्रवर्तकः ।

चार्वाकदर्शनस्य विचारधारा प्राचीनतमा वर्तते, इत्यैतिहासिका आमनन्ति, अस्य चार्वाकदर्शनस्य प्रवर्तकः चार्वाको

---

82 सं. वा. प्रवेशिका–पृ. सं. ५१

83 भ्वादिधातुः ४१४

वर्तते, अस्य परिचयो दुर्लभो वर्तते, तथापि जनश्रुतेरनुसारं कथयितुं शक्नुमो यद् - महाभारतस्य शान्तिपर्वणि लिखितमस्ति यद् - दुर्योधनस्य मित्रेष्वेकश्चार्वाको युधिष्ठिरस्य निन्दाकरणेन ब्रह्मकोपबलेन च विदग्धोभूदिति, अन्ते च प्रसिद्धेन श्लोकेन चार्वाकदर्शननामकं विषयमिमं समाप्नोमि यथा -

**यावज्जीवेत्सुखं जीवेदृणं कृत्वा घृतं पिबेत्।**
**भस्मीभूतस्य देहस्य पुनरागमनं कुतः**[८४] ।।

१.३.३.८. जैनदर्शनम् ।

**ततः कलौ सम्प्रवृत्ते सम्मोहाय सुरद्विषाम् ।**
**बुद्धौ नामा जिनसुतः कीकटेषु भविष्यति**[८५]।।

चार्वाकदर्शनबौद्धदर्शनयोरिव नास्तिकदर्शनेषु जैनदर्शनस्यानन्यतमं स्थानं वर्तते, अतो जैनदर्शनस्यापि संक्षेपेण परिचयः प्रस्तूयते तद्यथा -

१.३.३.८.१ जैनशब्दस्य निर्वचनम् ।

वास्तविकदृष्ट्या जैनबौद्धयोर्मध्ये न कोपि भेदः, इति समालोचका मन्यन्ते, उभयोः प्रादुर्भावसमयः प्रायः समान एव वर्तते, इतिहासतिमिरनामके ग्रन्थे शिवप्रीादनामा नृपो जैनबौद्धयोरेकार्थवाचकत्वमङ्गीकरोति । महावीरगौतमोभयनामभ्यां गणधरनामकः कश्चन श्रमण आसीदिति केषांचिन्मतमिदमस्ति, परन्तु

84 सं. वा. प्रवेशिका-पृ. सं. ९०

85 श्री. भा. १।३।२४

जैनसम्प्रदाये महावीरस्यैकादश शिष्या गणधरनामकेन अभिहिताः सन्ति, एतेषां जिनसम्बन्धाद् 'जैनः' इति शब्दो निष्पद्यते, जिनशब्दस्य नैकेर्था अमरकोशकारेण कथिताः सन्ति तद्यथा –

**सर्वज्ञः सुगतो बुद्धो धर्मराजस्तथागतः ।**

**समन्तभद्रो भगवान्मारजिल्लोकजिज्जिनः ॥**

**षडभिज्ञो दशबलोद्वयवादी विनायकः ।**

**मुनीन्द्रः श्रीघनः शास्ता मुनिः[८६] ॥**

जैनशब्दस्य निर्वचनं भवति यद् – लोकं जयतीति विग्रहे ''जि-जये[८७]'' इति धातोः ''इण्सिञ्जिदीङुष्यविभ्यो नक्[८८]'' इत्युणादिसूत्रेण नक्प्रत्ययेनुबन्धलोपे, प्रातिपदिकत्वात्स्वादिकार्य्ये सति जैनशब्दो निष्पन्नो भवति ।

१.३.३.८.२ जैनदर्शनस्य प्रवर्तकः ।

जैनदर्शनस्य प्रवर्तकेष्वेकस्य नाम न श्रूयते, अस्मिन् जैनदर्शने चतुर्विंशतिप्रणेतारो वा चतुर्विंशतितीर्थङ्करा अस्य जैनदर्शनस्य वा जैनधर्मस्य प्रचारे प्रसारे च स्वां भूमिकां निर्व्यूढवन्तः, तेषु ऋषभदेवादारभ्य वर्धमानमहावीरपर्य्यन्ताः सन्ति, अत एतेष्वाद्य ऋषभनाथो वर्तते, स 'आदिनाथः' इति नाम्ना ज्ञायते, अत्र जैनदर्शनस्य श्वेताम्बराणां द्वादशागामिग्रन्थाः सन्ति, तेषां नामान्यनेन प्रकारेण सन्ति यथा –

१. आचाराङ्गसूत्रम् ।

---

86 अमरकोशः १।१।१३-१४

87 भ्वादिधातुः ६७८

88 उणादिसूत्रम् २८२

२. सूत्रकृताङ्गम् ।

३. स्थानाङ्गम् ।

४. समवायाङ्गम् ।

५. भगवतीसूत्रम् ।

६. ज्ञाताधर्मकथा ।

७. उपासकदशाः ।

८. अन्तकृद्दशा ।

९. अनौत्तरापपादिकदशा ।

१०. प्रश्नव्याकरणानि ।

११. विपाकसूत्रम् ।

१२. दृष्टिवादः ।

अन्ते च प्रसिद्धेन श्लोकेन चार्वाकदर्शननामकं विषयमिमं समाप्नोमि यथा -

**जिनो देवो गुरुः सम्यक्तत्त्वज्ञानोपदेशकः ।**

**ज्ञानदर्शनचारित्राण्यपवर्गस्य वर्तनी[८९] ।।**

१.३.३.९. बौद्धदर्शनम् ।

**दानं शीलं क्षमा वीर्यं ध्यानप्रज्ञाबलानि च ।**

**उपायः प्रणिधिर्ज्ञानं दशबुद्धबलानि वै[९०] ।।**

वेदाः सनातनधर्मस्य आर्यभूमेर्भारतवर्षस्य मौलिकग्रन्थाः सन्ति, एतेषु स्थितानां ज्ञानविज्ञानानां दर्शनानामुपरि ये विश्वासं कुर्व्वन्ति, ते सर्व्वे वैदिका वा आस्तिकाः कथ्यन्ते, किन्तु ये तान्न

---

[89] सं. वा. प्रवेशिका-पृ. सं. ९८

[90] श्री. भा. १।३।२४

विश्वसन्ति, निन्दन्ति च ते वेदनिन्दकाः सर्व्वे नास्तिकाः सन्तीति सर्व्वैः कथ्यन्ते, अतश्चार्वाकानामनन्तरं वेदनिन्दकेषु नास्तिकदर्शनेषु बौद्धानां नामधेयमायाति, अतो बौद्धदर्शनस्यापि संक्षेपेण परिचयः प्रस्तूयते तद्यथा –

१.३.३.९.१ बौद्धशब्दस्य निर्वचनम् ।

वास्तविकदृष्ट्या बौद्धजैनयोर्मध्ये न कोपि भेदः, इति समालोचका मन्यन्ते, उभयोः प्रादुर्भावसमयः प्रायः समान एव वर्तते, इतिहासतिमिरनामके ग्रन्थे शिवप्रसादनामा नृपो जैनबौद्धयोरेकार्थवाचकत्वमङ्गीकरोति । बौद्धधर्मस्य प्रणेता गौतमबुद्धः सिद्धार्थगौतमबुद्धः इति नाम्ना विश्वविश्रुतोस्ति, बुद्धस्यार्थो भवति ज्ञानी, तस्यापरन्नाम शाक्यमुनिः । बौद्धशब्दस्य निर्वचनमनया रीत्या भवति यद् – बुध्यते इति बुद्धः – इति विग्रहे ''बुध–अवगमने[९१]'' इति धातोः ''मतिबुद्धिपूजार्थेभ्यश्च[९२]'' क्तप्रत्ययेनुबन्धलोपे, प्रातिपदिकत्वात्स्वादिकार्य्ये सति बौद्धशब्दो निष्पन्नो भवति । बौद्धशब्दस्य नैकेर्था अमरकोशकारेण कथिताः सन्ति तद्यथा –

**सर्वज्ञः सुगतो बुद्धो धर्मराजस्तथागतः ।**
**समन्तभद्रो भगवान्मारजिल्लोकजिज्जिनः ॥**
**षडभिज्ञो दशबलोद्वयवादी विनायकः ।**
**मुनीन्द्रः श्रीघनः शास्ता मुनिः[९३] ॥**

---

91 दिवादिधातुः १२८२

92 पा. सू. ३।२।१८८

93 अमरकोशः १।१।१३–१४

भगवान् बुद्धो भगवतो दशावतारेष्वन्यतमो वर्तते, यथा - श्रीमद्भागवतं कथयति यद् -

**ततः कलौ सम्प्रवृत्ते सम्मोहाय सुरद्विषाम् ।**

**बुद्धौ नामा जिनसुतः कीकटेषु भविष्यति[९४]।।**

अत्र बौद्धदर्शनस्य ग्रन्था द्वादश विभागेषु विभक्ताः सन्ति, तेषां नामान्यनेन प्रकारेण सन्ति यथा -

१. सूत्रम् ।

२. गेयम् ।

३. व्याकरणम् ।

४. गाथा ।

५. उदानम् ।

६. इत्युक्तम् ।

७. जातकः ।

८. अभूतधर्मः ।

९. वैपुल्यम् ।

१०. निदानम् ।

११. अवदानम् ।

१२. उपदेशः ।

अन्ते च प्रसिद्धेन श्लोकेन चार्वाकदर्शननामकं विषयमिमं समाप्नोमि यथा -

---

94 श्री. भा. १।३।२४

**बौद्धानां सुगतो देवो विश्वं च क्षणभङ्गुरम् ।**
**आर्यसत्याख्यया तत्त्वचतुष्टयमिदं क्रमात्[९५]।।**

१.४ दर्शनग्रन्थानामुपादेयता ।

अस्मिन् कलियुगे ग्रन्था अमृतरूपाः सन्ति, कथं यद् - दृश्यते ज्ञायते परमं तत्त्वमनेनेति दर्शनम् , दृश्यन्ते वेदा येन तदिति दर्शनम् , दृश्यन्ते वेदा यस्मिन् तदिति दर्शनम्, अत्र ''दृशिर्-प्रेक्षणे[९६]'' इत्यस्माद् धातोः ''करणाधिकरणयोश्च[९७]'' इत्यनेन करणेधिकरणे च ल्युट् प्रत्ययेनुबन्धलोपे ''पुगन्तलघूपधस्य च[९८]'' इत्यनेन उपधागुणे ''उरण्रपरः[९९]'' इत्यनेन रपरत्वे ''युवोरनाकौ[१००]'' इत्यनेन ''यु'' इत्यस्य स्थाने अनादेशे, णत्वे, स्वादिकार्य्ये सति दर्शनशब्दो निष्पन्नो भवति, दर्शनन्नाम (Philosophy ) सदसज्ज्ञानसोपानम् , अथवा दर्शनन्नाम ज्ञानम्प्रति प्रेमभावः, अतो दार्शनिका नाम ज्ञानप्रेमिणः, एभिर्दर्शनग्रन्थैरेव मानवो भवसागरं तरितुं शक्नोति, कथं यत् - प्राचीनकालत एव भारतदेशः धर्मेण, आचारेण, विचारेण, संस्कृत्या च निखिलस्यापि विश्वस्य श्रद्धाकेन्द्र आसीत् । भारतीयसंस्कृतौ च धर्मस्य सदाचारस्य महत्तमं स्थानमस्ति । तत्र च कोसौ धर्मः ? इति विचिकित्सायां '' यतोढ

95 सं. वा. प्रवेशिका-पृ. सं. १०१

96 भ्वादिधातुः ७८८

97 पा.सू. ३।३।११७

98 पा.सू. ७।३।८६

99 पा.सू. १।१।५१

100 पा.सू. ७।१।१

भ्युदयनिःश्रेयससिद्धिः स धर्मःध'' इति महर्षिणा कणादेन प्रतिपादितम्। येन च मानवस्याभ्युदयस्य निःश्रेयसस्य च सिद्धिर्भवति सो धर्मः । व्युत्पत्त्या तु धारणर्थकाद् धृञ् धारणे[१०१] धर्मशब्दस्य निष्पत्तिर्भवति । तथा च '' यश्च वस्तुस्वरूपं धारयते '' वा यो धृतः सन् धारयते स धर्म इति । एतदेवाभिलक्ष्य महाभारते धर्मस्वरूपं निगदितम् -

**धारणाद्धर्म इत्याहुः धर्मो धारयते प्रजाः ।**
**यत् स्याद्धारणसंयुक्तः स धर्म इति निश्चयः[१०२] ।।**

वस्तुतस्तु यस्य पदार्थस्य तत्स्वाभाविकमाचरणं तदेव तस्य धर्मः । अत एवैषोक्तिर्वतते यद् -

**धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः ।**
**तस्माद्धर्मो न हन्तव्यो मा नो धर्मो हतोवधीत्[१०३] ।।**

ज्ञानेनैव मानवो भवसागरं तरितुं तारयितुमपि शक्नोति, एतत्प्रयोगसम्बन्धिनी एका कथा अनुश्रूयते । तद्यथा - रविरिव भास्वतो भारवेः प्रारम्भिकं जीवनं द्रारिद्र्यपरिपूर्णमिति ऐतिहासिकानाम्मतम् । प्रायो बुद्धिजीविनां समेषां स्थितिरेतादृशी एव भवति, यतो हि यदवधि तेषां प्रतिभायाः सम्मानयिता कोपि राजा धनिको वा न भवेत् , अर्थसाध्यं सांसारिकसुखं कुतः स लभेत । अस्यां स्थितावपि भारविः काव्यरसोदधौ निमग्नो धनचिन्तापराङ्मुख एवासीत्, किन्तु तदीया पत्नी यदा कदा सर्वदा वा स्वकीयवाग्बाणैस्तं विध्यन्ती न शान्तिं लेभे । तस्या वाग्बाणैर्जजरीभूतयेता भारविः

---

101 भ्वादिधातुः ९६६
102 सु. भा. रत्नभाण्डागारम्
103 मनुस्मृतिः ८।१५

स्वकीयाया अकर्मण्यताया अनुभवमकरोत् । ततश्चचाल स राजाश्रयाद् धनमुपार्जयितुम् । यावत् कियद्दूरं याति, तावल्लतामण्डपैः परीतं पुष्पितवृक्षततिपरिवारितं गगननीलिम्ना नीलीकृतम्, जलेन आपूर्णमपि रिक्तमिव भासमानं, विकसितसरसिजसहस्रैः, सुवासितं, मधुलोलुपमधुपैर्गुञ्जितं, खगकुलसङ्कुलं, लोकोत्तरानन्ददायकं सरोवरमेकमवलोक्य विस्मृतनिजलक्ष्यः श्रान्तश्च भारविः विशश्रमिषुस्तत्रैवावस्थितः । तदा कविपुङ्गवस्य प्रस्तुतपद्याकारतया मुखरिता बभूव । तदेतदविकलं पद्यं प्रस्तूयते यद् –

**सहसा विदधीत न क्रिया–**
**मविवेकः परमापदां पदम् ।**
**वृणते हि विमृष्यकारिणं**
**गुणलब्धाः स्वयमेव सम्पदः**[१०४] **।।**

यदा भारविनामा कविरयं स्वकीयमिदं पद्यं सानन्दं पठन्नासीत्, तदैव विष्णुवर्धन आखेटाय निर्गतस्तत्रैवायातः । कवेः सरलं, सरसं, नीतिरीतिस्फीतीकृतं पद्यमाकर्ण्य सादरं तत् पद्यमादाय, कवये स्वराजधानीमागमाय सादरं निवेद्य च, स्वयमपि स्वां राजधानीं प्रत्याजगाम । तत्रागत्य राज्ञा आदिष्टं पद्यमिदं स्वर्णाक्षरैर्विलिख्य सपदि आनीयतामिति । ततः स्वर्णमयाक्षरेषु लिखितं तत्पद्यं महाराजेन स्वकीयशयनकक्षस्य नागदन्तेवलम्बितम् । इतः कविशिरोमणिरपि जीर्णवस्त्राणि परिधाय राजद्वारं समायातः, तदा तत्रत्यैर्द्वारपालैर्न्यक्कृतः,सः तथा निराशो भूत्वा स्वगृहं परावृत्तः, यथा

---

[104] सु. र. भा. १८२।९३५

प्रायो बाह्याम्बराभावे गुणिजनाः तिरस्क्रियन्ते राजभिः धनिकैर्वा । इत्थं व्यतीतेषु केषुचिद् दिवसेषु एकदा विष्णुवर्धनः पुनरपि मृगयायै निर्गतः, यदा ततः परावृत्य रात्रौ स्वशयनगृहं प्रविशति, तदा सः पश्यति, यत्तदीया महाराज्ञी केनचित् पुरुषेण सह पर्यङ्के सुखं शयानाढस्ति । स्वकीये पर्यङ्के महिष्या सह सुप्तं कमपि पुरुषमालोक्य तयोर्वधाय यावत् खड्गहस्तो जातः, तावदेव सहसा तस्य दृष्टिः स्वर्णाक्षरमये अमुष्मिन् पद्ये पपात '' सहसा विदधीत न क्रियाम् '' इति । तेन विचारितं यदिमौ उत्थाप्य दण्डनीयाविति, यदा जागृतौ, तदा तावुभौ विलोक्य स महदाश्चर्यसागरे मग्नः, यत् सा महाराज्ञी स च तस्य एकलः पुत्रः काचिद् धात्री चोरयित्वा क्वचिदनयत् तथा अद्यैव सायन्तने समये सः महिष्या कथमपि प्राप्य क्रोडीकृत आसीत् ।

तदनन्तरं राजा विष्णुवर्धनः तस्य कविवरस्य अन्वेषणाय सर्वत्र दूतान् प्रेषयामास, यल्लिखितेन पद्येन अद्य राज्ञः परिवाररक्षणं जातम् । दूताः कथञ्चित् तं महाकविमन्विष्य राजद्वारमानीतवन्तः, तदनु राजा पुष्कलं धनराशिं तस्मै प्रदाय राजपण्डितेषु तं ससम्मानं नियुयोज । ततः प्रभृतिः सः चिरकालं यावत् तस्य पण्डितसभामलङ्करोति स्म । महाकविरयं नीतिशास्त्रमर्मज्ञः । यथा राज्ञो विष्णुवर्धनस्यैकेन पद्येन परिवारसुरक्षा विहिता, तथास्य दैनिकजीवने ये विनियोगं करिष्यन्ति, तेषामपि नूनं हितसम्पादनं भविष्यतीति सामाजिकानां विश्वासः । नीतिविशारदः चाणक्योपि शीर्षकस्थं वाक्यांशं प्रकारान्तरेण परितोषयन् निर्दिशति यद् –

**कः कालः कानि मित्राणि को देशः कौ व्ययागमौ ।**
**कस्याहं का च मे शक्तिरिति चिन्त्यं मुहुर्मुहुः ।।**

यदि कोपि मानवः स्वकीये जीवने कार्यक्षेत्रे वा श्लोकोक्तानि सप्तवाक्यानि संस्मृत्य व्यवहरेत् तर्हि तस्य जीवने कदापि विपत्तिः पदमाधातुं कथमपि न प्रभवेत् , कथं यन्मानवो यौवनधनादिमदगर्वितो यदा पूर्वापरविचारान् परित्यज्य कार्याणि प्रारीप्सति, तदैव स महद् विपत्सागरे मज्जति, अन्यथा सुखेन स्वं कालं यापयन् लोकैः प्रशस्यते । अतः कदापि केनापि कथमपि कुत्रापि किमपि सहसा कार्यं न विधेयम् । अत एवोक्तं केनचिद् यद् -

**सहसा साहसेनापि कार्यं कार्यं न केनचित् ।**
**विचार्य शक्तिसम्पन्नो यत्करोति सुखाय तत् ।।**

इत्थं साहसिकीं क्रियां यः कोपि करोति, तदा स दुःखभागेव भवति, एतत्सर्व्वं ज्ञानी कर्त्तुमेव शक्नोति, अतः षट्सु दर्शनेष्वेकमपि दर्शनं भवबन्धनाद् मोक्तुं शक्नोति, सर्व्वाणि चेत्षड् दर्शनानि यस्य पार्श्वे वर्तते, तस्य तु का कथा ? सर्व्वेषां ज्ञानरत्नानामाकरः, सुखशान्तिप्रबोधकः, भारतीयसंस्कृतेराधारस्तम्भश्च वेदो वर्तते, यो दर्शन - राजनीति - मनोविज्ञान - आयुर्वेद - गणित - रसायनशास्त्र - पदार्थविज्ञान - भूगर्भविज्ञान - वनस्पतिविज्ञान - पदार्थविज्ञान - नाटक - काव्य - कामशास्त्र - ललितकलादीनां विविधविषयाणां प्रतिपादको वेदः, तथा च राष्ट्रियता - विश्वबन्धुत्वभावना - परोपकार - सत्कर्म - मातृ-पितृ-देव-अतिथिसत्कृति- शिल्पशास्त्र - अर्थशास्त्र - राजनीतिविज्ञानादीनां ज्ञानविज्ञानानां वेदो मूलभूतो वर्तते, तेषां समेषां ज्ञानानां पथप्रदर्शकानि षट् दर्शनशास्त्राणि सन्ति, अतो लिखितमस्ति यथा -

योगास्त्रयो मया प्रोक्ता नृणां श्रेयो विधित्सया ।
ज्ञानं कर्म च भक्तिश्च नोपायोन्योस्ति कुत्रचित्[१०५] ।।
इज्याचारदमाहिंसादानस्वाध्यायकर्मणाम् ।
अयं तु परमो धर्मो यद्योगेनात्मदर्शनम्[१०६] ।।
निःश्रेयसाधिगतिरत्र तु षोडशानां
ज्ञानात्प्रमाणमिह वेत्ति चतुष्टयं यः ।
ईशो जगत्सृजति यस्य मते स्वतन्त्रो
न्यायप्रवर्तकमहामुनये नमोस्मै[१०७] ।।
भावाष्षडेव मुनिना विहितास्तदन्ते
चान्योप्यभाव इति सप्तपदार्थशास्त्रम् ।
सामान्यवर्ण्णनपरोपि विशेषरूपोसौ
नित्यमेव जयति प्रथितः कणादः[१०८] ।।
धर्मे प्रमीयमाणो हि वेदेन करणात्मना ।
इति कर्तव्यताभागं मीमांसा पूरयिष्यति[१०९] ।।
वेदोक्तकर्मसरणिः स तु यागरूपो
विध्यर्थवादयुगलं परिलम्बमानः ।
धर्मो भवेत्किल ततो जननान्तरेषु
कर्मैव सर्वमिति जैमिनये नमोस्तु[११०] ।।

---

105 री. भा. ११।२०।६

106 याज्ञवक्यशिक्षा १।१।८

107 सं. वा. प्रवेशिका-पृ. सं. ४३

108 सं. वा. प्रवेशिका-पृ. सं. ५५

109 सं. वा. प्रवेशिका-पृ. सं. ५६

**जिनो देवो गुरुः सम्यक्तत्त्वज्ञानोपदेशकः ।**

**ज्ञानदर्शनचारित्राण्यपवर्गस्य वर्तनी[१११] ॥**

**दानं शीलं क्षमा वीर्यं ध्यानप्रज्ञाबलानि च ।**

**उपायः प्रणिधिर्ज्ञानं दशबुद्धबलानि वै[११२] ॥**

अनेन प्रकारेण दर्शनग्रन्थानामुपादेयतां प्रतिपाद्य विषयमिममत्रैव समाप्नोमि ।

१.५ सांख्यदर्शनस्य परिचयः ।

**संख्यां प्रकुर्वते चैव प्रकृतिं च प्रचक्षते ।**

**तत्त्वानां चतुर्विंशतिस्तेन सांख्याः प्रकीर्तिताः[११३] ॥**

आस्तिकदर्शनेषु सांख्यदर्शनं मौख्यं स्थानमावहति, किन्तु आस्तिकताया नास्तिकतायाश्च विषये विदुषां मतमेकं नास्ति, केचन विद्वांसः सांख्यदर्शनं सेश्वरदर्शनमास्तिकमिति कथयन्ति, तथा च केचन विद्वांसः सांख्यदर्शनं निरीश्वरदर्शनं नास्तिकमिति कथयन्ति सर्व्वेषां वेदानामर्थावबोधाय, संरक्षणाय, उच्चारणविधिज्ञानाय, च षड् दर्शनानि तत्तदृषिभिर्महर्षिभिर्विरचितानि सन्ति, तेषु सांख्यदर्शनस्य संक्षेपेण परिचयो विलिख्यते तद्यथा -

१.५.१ सांख्यशब्दस्य निर्वचनम् ।

पाणिनीयव्याकरणदृष्ट्या सांख्यशब्दस्य निर्वचनं क्रियते तद्यथा - सांख्यान्नाम संख्यायन्ते गण्यन्ते येनेति सांख्यम् , अथवा संख्यायते प्रकृतिपुरुषान्यथाख्यातिरूपोवबोधः सम्यग्ज्ञायते येन तदिति

---

110 सं. वा. प्रवेशिका-पृ. सं. ५५

111 सं. वा. प्रवेशिका-पृ. सं. ९८

112 श्री. भा. १।३।२४

113 सं. वा. प्रवेशिका-पृ. सं. ३४

सांख्यम् , अत्र समुपसर्गात् ''ख्या-प्रकथने[११४]'' इत्यस्माद् धातोः ''आतश्चोपसर्गे[११५]'' इत्यनेन अङ् प्रत्यये अनुबन्धलोपे ''आतो लोप इटि च[११६]'' इत्यनेन आकारस्य लोपे, प्रातिपदिकत्वात् सुप्रत्यये, स्त्रीत्वविवक्षायां ''अजाद्यष्टाप्[११७]'' इत्यनेन टाप्प्रत्ययेनुबन्धलोपे संख्याशब्दो निष्पद्यते, तदनन्तरं संख्याया इदमिति सांख्यम् , अत्र ''तस्येदम्[११८]'' इत्यनेन अण्प्रत्ययेनुबन्धलोपे, णित्त्वात् , ''तद्धितेष्वचामादेः[११९]'' इत्यनेन आदिवृद्धौ, स्वादिकार्य्ये सति सांख्यशब्दो निष्पन्नो भवति, अथवा समुपसर्गात् ''चक्षिङ्-व्यक्तायां वाचि[१२०]'' इत्यस्माद् धातोः ''आतश्चोपसर्गे[१२१]'' इत्यनेन अङ् प्रत्यये अनुबन्धलोपे, ''चक्षिङः ख्याञ्[१२२]'' इत्यनेन ख्यादेशे ''आतो लोप इटि च[१२३]'' इत्यनेन आकारस्य लोपे, प्रातिपदिकत्वात् सुप्रत्यये, स्त्रीत्वविवक्षायां ''अजाद्यष्टाप्[१२४]'' इत्यनेन टाप्प्रत्ययेनुबन्धलोपे संख्याशब्दो निष्पद्यते, तदनन्तरं संख्याया इदमिति सांख्यम् , अत्र

114 अदादिधातुः १०६९

115 पा.सू. ३।३।१०६

116 पा.सू. ६।४।६४

117 पा.सू. ४।१।४

118 पा.सू. ७।३।१२०

119 पा.सू. ७।२।११७

120 अदादिधातुः १०८७

121 पा.सू. ३।३।१०६

122 पा.सू. २।४।५४

123 पा.सू. ६।४।६४

124 पा.सू. ४।१।४

''तस्येदम्[१२५]'' इत्यनेन अण्प्रत्ययेनुबन्धलोपे, णित्त्वात् , ''तद्धितेष्वचामादेः[१२६]'' इत्यनेन आदिवृद्धौ, स्वादिकार्य्ये सति सांख्यशब्दो निष्पन्नो भवति ।

१.५.२ सांख्यशब्दस्य विविधा अर्थाः ।

सांख्यशब्दस्य अनेकेर्थाः कथिताः सन्ति तद्यथा - संख्याया वर्ण्णनं यत्र क्रियते तत्सांख्यम् , संख्या चर्चा विचारणा[१२७], महाभारतकारो लिखति यद् -

**संख्यां प्रकुर्वते चैव प्रकृतिश्च प्रचक्षते ।**
**तत्त्वानां चतुर्विंशतिस्तेन सांख्याः प्रकीर्तिताः[१२८] ।।**

इत्थममरकारेण महाभारतकारेण च सांख्यशब्दस्य विविधा अर्थाः कथिताः सन्ति ।

१.५.३ सांख्यदर्शनस्य प्रवर्तकः ।

अस्य सांख्यदर्शनस्याद्यः प्रवर्तको देवहूतिकर्दमयोः पुत्रो महर्षिकपिलो वर्तते, संस्कृतसाहित्ये नैके कपिलनामधारिणो वर्तन्ते तद्यथा -

१. श्वेताश्वेतरोपनिषदि एको ब्राह्मणपुत्रः कपिलः ।

२. श्रीमद्भगवद्गीतायां कथितः कपिलर्षिः ।

३. रामायणे महाराजसगरस्य षष्टिसहस्रदग्धेष्वेकः कपिलः।

---

125 पा.सू. ७।३।१२०

126 पा.सू. ७।२।११७

127 अमरकोशः १।५।२

128 महाभारत-शान्तिपर्व ३०६।४३

४. शिवसंहिताया योगिश्रेष्ठः कपिलः ।

५. महाभारते कथितः कपिलः ।

६. श्रीमद्भागवतमहापुराणे कथितो देवहूतिकर्दमयोः पुत्रः कपिलः ।

७. श्रीमार्कण्डेयपुराणे कथितः कपिलः ।

एतेषु सप्तसु श्रीमद्भागवतमहापुराणे कथितो देवहूतिकर्दमयोः पुत्रः कपिल एव सांख्यदर्शनस्य प्रवर्तको वर्तते, इति दार्शनिकाः स्वीकुर्व्वन्ति, अयमेव महर्षिकपिलो भगवतः पञ्चमावतारोस्ति, किन्त्वन्ये दार्शनिकाः कथयन्ति यत् – श्रीमार्कण्डेयपुराणे कथितः शाल्मलनरेशस्य सप्तसु पुत्रेषु कपिलोढ न्यतमो निगदितो वर्तते, तद्यथा –

**श्वेतश्च हरितश्चैव जीमूतो रोहितस्तथा ।**
**धुतिमत्प्रकरश्चैव कपिलश्चापि सप्तमः ।**
**वपुष्मतः सुताः सप्त शाल्मलेशस्य चाभवन्**[१२९] **।।**

अनेन प्रकारेण सांख्यदर्शनस्य प्रवर्तको देवहूतिकर्दमयोः पुत्रः कपिल एव वर्तते ।

१.५.४ सांख्यदर्शनस्य ग्रन्थाः ।

अस्य सांख्यदर्शनस्याद्यो ग्रन्थः कः ? इति विषये विदुषां विभिन्नानि मतानि सन्ति, केचन विद्वांसः ‘तत्त्वसमासः’ महर्षिकपिलेन प्रणीतः सांख्यदर्शनस्य मूलभूतो ग्रन्थः, इति कथयन्ति, अन्ये विद्वांसः ‘षष्टितन्त्रम्’ महर्षिकपिलेन प्रणीतः सांख्यदर्शनस्य

---

[129] मा. पु. २८६।२६

मूलभूतो ग्रन्थः, इति कथयन्ति, केचन विद्वांसः 'सांख्यप्रवचनसूत्रम्' वा 'सांख्यषडाध्यायी' महर्षिकपिलेन प्रणीतः सांख्यदर्शनस्य मूलभूतो ग्रन्थः, इति कथयन्ति, एतेषु विषयेषु 'षष्टितन्त्रम्' महर्षिकपिलेन प्रणीतः सांख्यदर्शनस्य मूलभूतस्य ग्रन्थस्य विषये प्रमाणान्युपलभ्यन्ते यथा –

**सांख्यारूपेण सङ्कल्पो वैष्णवः कपिलादृषेः।**
**उदितो यादृशः पूर्वं तादृशं शृणु मेखिलम् ।।**
**षष्टिभेदं स्मृतं तन्त्रं सांख्यं नाम महामुनेः ।**
**प्राकृतं वैकृतं चेति मण्डले द्वे समासतः[१३०] ।।**

अयमेव कपिलमुनिः स्वशिष्याय आसुरये सांख्यं शिक्षयामास, तस्य आसुरेरनन्तरं पञ्चशिखः, ईश्वरकृष्णः, भार्गवः, उल्लूकः, वाल्मीकिः, हारीतः, वार्षगण्यः, वशिष्ठः, गर्गः, इत्येते सांख्यदर्शनस्योपबृंहणं कृतवन्तः, सम्प्रति सांख्यदर्शनस्योपरि नैके ग्रन्थाः सन्ति, तेषामुपलब्धानां नामान्यनेन प्रकारेण सन्ति यथा –

१. तत्त्वसमासः ।
२. षष्टितन्त्रम् ।
३. पञ्चशिखसूत्रम् ।
४. अनिरुद्धवृत्तिः ।
५. सांख्यकारिका ।

सांख्यस्य मूलसूत्राणामुपरि त्रयो व्याख्याकारा भाष्यकाराः संजाताः सन्ति सन्ति यथा –

---

130 सं. वा. प्रवेशिका–पृ. सं. ३५

१. अनिरुद्धः ।

२. महादेवः ।

३. विज्ञानभिक्षुः ।

सांख्यदर्शनस्य प्रसिद्धेषु ग्रन्थेषु श्रीमता ईश्वरकृष्णेन आर्य्यछन्दसा विरचिता सांख्यकारिका विशेषरूपेण सरला सुलभा बोधगम्या च वर्तते, सांख्यकारिकाया उपरि सप्तभिर्व्याख्याकारैः सप्त व्याख्यानानि कृतानि सन्ति, तेषां नामान्यनेन प्रकारेण सन्ति यथा –

| क्रमः | व्याख्यानग्रन्थः | व्याख्याकारः |
|---|---|---|
| १. | माठरवृत्तिः | आचार्यमाठरः |
| २. | युक्तिदीपिका | आचार्यनारायणतीर्थः |
| ३. | गौडभाष्यम् | आचार्यनारायणतीर्थः |
| ४. | जयमङ्गला | आचार्यनारायणतीर्थः |
| ५. | चन्द्रिका | आचार्यनारायणतीर्थः |
| ६. | तत्त्वकौमुदी | वाचस्पतिमिश्रः |
| ७. | सुवर्णसप्तशास्त्रम् | पारमार्थरचितम् |

अनेन प्रकारेण सांख्यदर्शनस्य ग्रन्थाः सन्ति, तथा च विविधैः टीकाकारैः कृताः टीकाग्रन्थाश्च वर्तन्ते ।

१.५.५ सांख्यदर्शनस्य प्रतिपाद्यविषयः।

आस्तिकदर्शनेषु सांख्यदर्शनस्य मौख्यं स्थानमस्ति, तदेव सांख्यदर्शनं देवहूतिकर्दमयोः पुत्रेण महर्षिकपिलेन प्रवर्तितं वर्तते, तत्र दुःखानामात्यन्तिकनिवृत्तिः एव सांख्यदर्शनस्य प्रतिपाद्यो विषयो वर्तते, प्रकृतिपुरुषविषयकभेदज्ञानजन्यमुक्तिलाभ एवास्य सांख्यदर्शनस्य

प्रयोजनमस्ति, अस्मिन् सांख्यदर्शने पञ्चविंशतितत्त्वानां विचारः कृतोस्ति, एतेषां पञ्चविंशतितत्त्वानां सम्यग्ज्ञानेन मोक्षोवश्यं लभ्यते, इति अस्य सांख्यदर्शनस्य प्रमुखः सिद्धान्तो वर्तते, यथा –

**पञ्चविंशतितत्त्वज्ञो यत्र तत्राश्रमे वसेत् ।**
**जटी मुण्डी शिखी वापि मुच्यते नात्र संशयः[१३१] ।।**

सांख्यदर्शने कथितानां पञ्चविंशतितत्त्वानां नामान्यनेन प्रकारेण सन्ति यथा –

१. पुरुषः ।
२. प्रकृतिः ।
३. महत् ।
४. अहङ्कारः ।

- पञ्चतन्मात्राणि ।

५. रूपम् ।
६. रसः ।
७. गन्धः ।
८. स्पर्शः ।
९. शब्दः ।
१०. मनः ।

- पञ्च ज्ञानेन्द्रियाणि।

११. चक्षुः ।
१२. रसना ।

---

131 सं. वा. प्रवेशिका–पृ. सं. ३५

१३. घ्राणः ।

१४. त्वक् ।

१५. श्रोत्रम् ।

पञ्च कर्मेन्द्रियाणि।

१६. वाक् ।

१७. पाणिः ।

१८. पादः ।

१९. पायुः ।

२०. उपस्थः ।

पञ्च महाभूतानि ।

२१. पृथिवी ।

२२. जलम् ।

२३. तेजः ।

२४. वायुः ।

२५. आकाशम् ।

अयमेव सांख्यसृष्टिक्रमो वर्तते, एतेषां चत्वारो विभागाः प्रदर्शिताः सन्ति तद्यथा –

१. केवलप्रकृतिः (प्रकृतिः प्रधानं वा ) ।

२. प्रकृतिविकृत्युभयात्मकानि (महत् , अहङ्कारः, पञ्चतन्मात्राणि) ।

३. केवलविकृतयः (एकादशेन्द्रियाणि, पञ्च महाभूतानि ) ।

४. न प्रकृतिर्न विकृतिः (पुरुषः) ।

एतत्सम्बन्धिनीं कारिकां सांख्यकारिकाकारः सांख्यदर्शने कथयति तद्यथा -

**मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।**
**षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः[१३२] ।।**

सांख्यदर्शनकारोस्मिन् सांख्यदर्शने दुःखानि त्रिविधानि प्रतिपादयति तद्यथा -

१. आध्यात्मिकम् ।
२. आधिदैविकम् ।
३. आधिभौतिकम् ।

तत्र आत्मनि इति आध्यात्मिकम् , एतदाध्यात्मिकं दुःखमपि द्विविधमस्ति, तद्यथा -

१. शारीरं दुःखम् ।
२. मानसं दुःखम् ।

१. आध्यात्मिकम् ।

तत्र वात-पित्त-श्लेष्मादिपीडाजन्यानि दुःखानि शरीरमधिकृत्य उत्पद्यन्ते, अत एतच्छारीरं दुःखम् , काम-क्रोध-लोभ-मोह-मद-मात्सर्य-ईर्ष्या- शोकादिजन्यानि दुःखानि मानसानि भवन्ति ।

२. आधिदैविकम् ।

132 सांख्यकारिका-कारिकासंख्या-३

देवेषु इति आधिदैविकम् , तत्र अतिवृष्ट्यनावृष्टिभूकम्प-वात्याघात-वज्रपातोल्कापात-जलच्छ्वासभूदाहमहामारीवसन्तिविसूचिकाजन्यानि दुःखानि आधिदैविकानि भवन्ति, तेषां देवयोनिविशेषादेव भवनं भवति, अत आधिदैविकं दुःखमिदमस्ति ।

३. आधिभौतिकम् ।

भूतेषु इति आधिभौतिकम् , तत्र मनुष्य - पशु - पक्षि - सरीसृप - कीट - पतङ्ग - वृक्ष - लतादिभिरुत्पन्नानि दुःखानि आधिभौतिकानि कथ्यन्ते, तेषां भूतविशेषाद् भवनं भवति, अत आधिभौतिकं दुःखमिदमस्ति ।

यथा - असतः सज्जायते, इति बौद्धाः कथयन्ति, सतोढ सज्जायते, इति नैयायिका वैशेषिकाश्च कथयन्ति, वेदान्तिनश्च विवर्तवादं स्वीकुर्व्वन्ति, तद्विपरीततया सांख्याः सत्कार्य्यवादमङ्गीकुर्व्वन्ति, एतेषां सांख्यानां मते सतोसज्जायत इति, एतदर्थमेव सांख्यैः पञ्च प्रमाणानि कथितानि सन्ति, एतेषां नामान्यनेन प्रकारेण सन्ति यथा -

१. असदकरणाद् ।

२. उपादानग्रहणात् ।

३. शक्तस्य शक्यकरणात् ।

४. सर्वसम्भवाभावात् ।

५. कारणभावात् ।

सांख्यमते मोक्षो नाम कैवल्यमित्युच्यते, मोक्षे पुरुषो नित्यशुद्धचैतन्यरूपेण प्रकाशितो भवति, चैतन्यस्य आनन्दे सुखे वा या

स्थिता सैव कैवल्यमित्युच्यते । पञ्चविंशतितत्त्वाभ्यासात्केवलज्ञानमुत्पद्यते, सांख्यमते तु मुक्तिः मोक्षो वा द्विधा प्रतिपाद्यते तद्यथा –

१. जीवन्मुक्तिः ।

२. विदेहमुक्तिः ।

तत्र जीवन्मुक्तेरवस्थायां देहे सत्यपि देहेन सह सम्बन्धो न भवति, कर्म्मणो बन्धनं न भवति, केवलं प्रारब्धकर्मणा फलभोग एव शरीरेण क्रियते, यथा – कुम्भकारस्य चक्रं कुम्भकारेण चलितं सत्कुम्भकारेण त्यक्तेपि पुनः स्वयं चलति, तथैव प्रारब्धकर्म्मवशाज्जीवन्मुक्ते शरीरं तत्कर्म्मफलं भुङ्क्ते, परन्तु यदा तस्य कर्म्मणः समाप्तिर्जायते, तदा विदेहमुक्तिः प्राप्यते, अत्र पुरुषस्य मुक्त्यर्थं प्रकृतिः प्रधानसहायिका भवति, तद्यथा –

**रङ्गस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्यात् ।**
**पुरुषस्य तथात्मानं प्रकाश्य विनिवर्तते प्रकृतिः**[१३३]**।।**

अतः संख्यावानेव ज्ञानवान् वा पण्डितो वर्तते, सांख्यसम्मतमेव ज्ञानं विवेकज्ञानेन वा विवेकख्यातिरूपेण प्रसिद्धमस्ति। ईश्वरकृष्णकृता सांख्यकारिका सांख्यदर्शनस्य महत्त्वपूर्णो ग्रन्थो वर्तते, यावती प्रसिद्धिरस्य ग्रन्थस्य वैतासां कारिकाणां वर्तते, तावती प्रसिद्धिरन्यदर्शनस्यैकस्यापि ग्रन्थस्य नास्ति। माठरवृत्तौ ईश्वरकृष्णस्य कृते 'भगवान्' इत्यादरार्थकस्य शब्दस्य प्रयोगः कृतो वर्तते, तेन विरचिता सांख्यकारिका तु वर्तमानस्य

---

133 सांख्यकारिका–कारिकासंख्या–५९

समयस्य कृते तु श्रद्धास्पदा वर्तते, अपि तु सुदीर्घकालपर्य्यन्तं सांख्यज्ञानहेतुपरमप्रामाणिकस्य ग्रन्थस्य रूपे विशेषरूपेणेयं सांख्यकारिका श्रद्धास्पदा वर्तते, अनुयोगद्वारसूत्रसदृशैर्नैकैर्ग्रन्थैः प्रमाणितमिदमस्ति यत् - प्रथमशताब्दीपर्य्यन्तमस्य ग्रन्थस्योपरि नैकैष्टीकाकारैर्नैकाष्टीका लिखिताः सन्ति । श्रीमतेश्वरकृष्णेन विरचितायामस्यां सांख्यकारिकायां सप्ततिः (७०) कारिकाः सन्ति, अतः सांख्यदर्शनस्यापरन्नाम सांख्यसप्ततिः, सुवर्णसप्ततिः, हिरण्ययसप्ततिरपि वर्तते, इत्थमिमां सांख्यकारिकां हृदि निधाय नैकैष्टीकाकारैर्नैकाष्टीका लिखिताः सन्ति, तासु प्रमुखतमाः टीकाः सन्ति तद्यता -

१. माठरवृत्तिः ।

२. युक्तिदीपिका ।

३. जयमङ्गला ।

४. तत्त्वकौमुदी ।

५. गौडपादभाष्यम् ।

सांख्यकारिकाया उपरि मुख्या एताः टीकाः सन्ति, सांख्यकारिकायां प्रथमा तथा चान्तिमा च कारिकेयं वर्तते तद्यथा -

**दुःखत्रयाभिघाताज्जिज्ञासा तदभिघातके हेतौ ।**
**दृष्टे सापार्था चेन्नैकान्तात्यन्ततोभावात्**[१३४] **।।**
**एतत्पवित्रमग्र्यूयं मुनिरासूरयेनुकम्पया प्रददौ ।**
**आसुरिरपि पञ्चशिखाय तेन च बहुधा कृतं तन्त्रम्**[१३५] **।।**

---

134 सांख्यकारिका-कारिकासंख्या-१

135 सांख्यकारिका-कारिकासंख्या-७०

## पुराणेषु सांख्ययोगवेदान्तविमर्शः

इत्थमिदं परमपवित्रं सर्व्वश्रेष्ठं च ज्ञानं कपिलमुनिः सानुकम्पं सर्व्वप्रथममासुरिनामकाय मुनये ददौ, स एवासुरिमुनिः स्वशिष्याय पञ्चशिखाचार्य्याय दत्तवान् , तथा स एवासुरिशिष्यः पञ्चशिखाचार्य्यः संसारेस्मिन् विस्तारयामास, अस्यां सांख्यकारिकायां मुख्यत्वैते विषया ग्रन्थकारैर्विवेचिताः सन्ति तद्यथा –

१. सत्कार्य्यवादः ।

२. पुरुषस्वरूपम् ।

३. प्रकृतिस्वरूपम् ।

४. सृष्टिक्रमः ।

५. प्रत्ययसर्गः ।

६. प्रमाणत्रयम् ।

७. प्रत्यक्षप्रमाणम् ।

८. गुणसिद्धान्तः ।

९. विपर्ययः ।

१०. अपवर्गः ।

इत्थं नष्टे शरीरे सति जीवः स्वस्य प्रयोजनस्य सिद्धिं विधाय प्रकृतेर्निवृत्तेरनन्तरं पुरुष ऐकान्तिकमात्यन्तिकं च कैवल्यं च संप्राप्नोति, अनेन प्रकारेण सांख्यदर्शनस्य परिचयं संक्षेपेण विलिख्य विषयं समाप्नोमि ।

१.६ वेदाङ्गानां परिचयः ।

अतिगभीरस्य वेदस्य शब्दानां “ अङ्ग्यन्ते ज्ञायन्ते वेदा अमीभिरिति अङ्गानि, अगि गतौ[१३६] अर्थमवबोधयितुं शिक्षादीनि षडङ्गानि प्रवृत्तानि, अत एव तेषामपरविद्यारूपत्वं मुण्डकोपनिषदि कथितं यत् – ‘‘ द्वे विद्ये वेदितव्ये इति ह स्म यद् ब्रह्मविदो वदन्ति[१३७] ’’ परा चैवापरा च, तत्रापरा ऋग्वेदः, यजुर्वेदः, सामवेदोढ थर्ववेदः, तेषां ज्ञानाय वेदपुरुषस्य ज्ञानाय षडङ्गानि सन्ति, यथा –

१.६.१ छन्दःशास्त्रम् ।

१.६.२ कल्पशास्त्रम् ।

१.६.३ ज्योतिषशास्त्रम् ।

१.६.४ निरुक्तशास्त्रम् ।

१.६.५ शिक्षाशास्त्रम् ।

१.६.६ व्याकरणशास्त्रम् ।

तद्यथा पाणिनीयशिक्षायां महर्षिपाणिनिना लिखितंमस्ति यद् –

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोथ पठ्यते**
**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ।**
**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्**
**तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते[१३८] ।।**

---

136 भ्वादि..१५०

137 मुण्डकोपनिषद्

138 पाणिनीयशिक्षा

एतेषामतिगभीरस्य वेदस्य शब्दानामर्थमवबोधयितुं शिक्षादीनां प्रवृत्तानां षडङ्गानां परिचयः संक्षेपेण प्रस्तूयते तद्यथा –

१.६.१ छन्दःशास्त्रम् ।

लौकिकान् वैदिकांश्च वाक्यविशेषान् पादविरामादिव्यवस्थापनेन छन्दयति छदि – संवरणे[१३९] नियमयतीति छन्दः, पिङ्गलादिमहर्षिप्रणीतो ग्रन्थविशेषः ।

१.६.२ कल्पशास्त्रम् ।

कल्प्यते समर्थ्यते ‘‘ कृपू – सामर्थ्ये[१४०] यागप्रयोगोत्रेति कल्पः, अर्थात् केषां मन्त्राणां कुत्र प्रयोगः ? इति प्रयोगक्रमकल्पकापस्तम्बादिमुनिप्रणीतो ग्रन्थविशेषः ।

१.६.३ ज्यौतिषशास्त्रम् ।

सूर्यचन्द्रादिज्योतिर्द्वारा तत्तद्वेदशास्त्रादिविहितानां कर्मणाम् अनुष्ठानकालस्यनिर्णयेष्टानिष्टफलप्रदर्शको ग्रन्थविशेषः ।

१.६.४ निरुक्तशास्त्रम् ।

अर्थज्ञाने नैरपेक्ष्येण पदसमूहो यत्रोक्तं तन्निरुक्तम् । अस्य प्रणेता प्रजापतिः कश्यपः, केचन विद्वांसः कथयन्ति यद्, महर्षियास्कप्रणीतं निरुक्तशास्त्रमस्ति ।

१.६.५ शिक्षाशास्त्रम् ।

तत्तद्वर्णानां स्थानप्रयत्नोच्चारणादिक्रमप्रदर्शिका शिक्षा, अथवा स्वरवर्ण्णादीनामुच्चारणप्रकारो यत्र शिक्ष्यते नाम उपदिश्यते सा शिक्षा अनेकाः शिक्षास्सन्ति, तत्र वैदिक्यः शिक्षा द्वाविंशतिः

---

[139] चुरादिः १६९४

[140] भ्वादिः ८११

समुपलभ्यन्ते, एवं लौकिक्यः शिक्षा एकोनाशीत्युत्तरैकशतं (१७९) समुपलभ्यन्ते, तासु कासाञ्चन नामान्यनेन प्रकारेण सन्ति यथा -

१. याज्ञवल्क्यशिक्षा ।

२. वाशिष्ठी शिक्षा ।

३. माण्डव्यशिक्षा ।

४. भरद्वाजशिक्षा ।

५. माध्यन्दिनीयशिक्षा।

६. अवसाननिर्णयशिक्षा ।

७. पाणिनीयशिक्षा ।

८. कात्यायिनी शिक्षा।

९. पाराशरी शिक्षा ।

१०. माण्डव्यशिक्षा ।

११. अमोघानन्दिनी शिक्षा ।

१२. माध्यन्दिनीयशिक्षा।

१३. वर्णरत्नप्रदीपिका शिक्षा ।

१४. केशवी शिक्षा ।

१५. मल्लशर्मशिक्षा ।

१६. स्वराङ्कुरशिक्षा ।

१७. षोडशश्लोकी शिक्षा ।

१८. स्वरभक्तिलक्षणशिक्षा ।

१९. प्रातिशाख्यप्रदीपशिक्षा ।

२०. नारदीयशिक्षा ।

२१. गौतमी शिक्षा ।

इत्थं नैके शिक्षाग्रन्थाः सम्प्रत्यपि समुपलभ्यन्ते, तासु प्राचीनभारतीयभाषाशास्त्रस्योच्चारणविद्याया गम्भीरानुशीलनं तत्तदृषिभिर्महर्षिभिः कृतमस्ति ।

१.६.६ व्याकरणशास्त्रम् ।

व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेन तद् व्याकरणम्, व्याङ्-उपसर्गाभ्यां '' डुकृञ् करणे[१४१] '' इत्यस्माद् धातोः ''करणाधिकरणयोश्च[१४२]'' इत्यनेन करणे ल्युट् प्रत्ययेनुबन्धलोपे ''सार्वधातुकार्धातुकयोः[१४३]'' इत्यनेन गुणे ''उरण्रपरः[१४४]'' इत्यनेन रपरत्वे ''युवोरनाकौ[१४५]'' इत्यनेन ''यु'' इत्यस्य स्थाने अनादेशे, णत्वे, स्वादिकार्य्ये सति व्याकरणशब्दो निष्पन्नो भवति । अथवा शब्दज्ञानजनकं व्याकरणम्, शब्दसाधुत्वबोधकः सूत्रात्मको लक्ष्य - लक्षणात्मको वा ग्रन्थविशेषस्तदुक्तं पातञ्जले महाभाष्ये यद् - लक्ष्यलक्षणं व्याकरणं, लक्ष्यञ्च लक्षणञ्चैतत्समुदितं व्याकरणं भवति, शब्दो हि लक्ष्यः, सूत्रं लक्षणम् । न चैवं समुदाये व्याकरणशब्दः प्रवृत्तोवयवेनोपपद्यते । सूत्राणि चाप्यधीयान इष्यते वैयाकरण इतीष्टं न सिद्ध्येदिति वाच्यं, समुदायेषु प्रवृत्तानां शब्दानां पञ्चाल - तैल - घृतादीनामवयवेष्वपि पूर्वे पञ्चालाः, उत्तरे पञ्चालाः, तैलं भुक्तम्, घृतं भुक्तमित्यादिरूपेणाजस्रं प्रवृत्तेर्दर्शनात् । अथवा यथा - राहोः

---

141 तनादिधातुः १५६६

142 पा.सू. ३।३।११७

143 पा.सू. ७।३।८४

144 पा.सू. १।१।५१

145 पा.सू. ७।१।१

शिरः इत्येकस्मिन्नपि वस्तुनि शब्दार्थभेदाद् भेदव्यवहार अनेकाढ वस्थायुक्तं शिरो हि राहुशब्दार्थः यत्किञ्चिदेकावस्थायुक्तं तच्छिरः शब्दार्थः, एवं व्याकरणस्य सूत्रमित्यत्रापि व्यपदेशिवद्भावेन षष्ठ्यर्थस्योपपत्या सूत्रमस्तु व्याकरणशब्दार्थः । अस्य व्याकरणशास्त्रस्य प्रणेतारोष्ट नव वा आचार्य्या बभूवुः । कैश्चिद् विद्वद्भिर्व्याकरणप्रणेतृनामानि लिखितानि यथा -

**इन्द्रश्चन्द्रः काशकृत्स्नापिशाली शाकटायनः ।**
**पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः**[१४६] **।।**

**अपरे व्याकरणनामानि लिखन्ति यद् -**

**ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम् ।**
**सारस्वतं चापिशलं शाकलं पाणिनीयकम्**[१४७] **।।**

एतेषां व्याकरणानां संक्षिप्तपरिचयो वर्तते यथा -

१.६.६.१ ऐन्द्रम् ।

ऐन्द्रं व्याकरणं तावच्छ्रुत्या ज्ञायते । तथा हि ''वाग्वै पराच्च व्याकृतावदत्, ते देवा इन्द्रमब्रुवन्, इमां नो वाचं व्याकुरु'' तामिन्द्रो मध्यमोपक्रम्य व्याकरोत्, तस्मादिदं व्याकृतवागुच्यते, इति श्रुत्यनुसारमिन्द्रस्य व्याकरणकर्तृत्वे प्रमाणम् ।

१.६.६.२ चान्द्रम् ।

चान्द्रास्तु ''आत्मोदरकुक्षिष्विति पेठुः'' इतिवचनाच्चान्द्रव्याकरणमपि पूर्वमासीदिति सिद्ध्यति ।

---

146 पा.शा.ल.इतिहासपृ. सङ्ख्या ५

147 पा.शा.ल.इतिहास पृ. सङ्ख्या ५

१.६.६.३ काशकृत्स्नम् ।

काशकृत्स्नं व्याकरणं भगवता भाष्यकारेण ''शताच्च ठन्यतावशते[१४८]'' इत्यस्मिन् भाष्ये नाम्ना निर्दिष्टम् ।

१.६.६.४ कौमारम् ।

अग्निपुराणस्यान्त्यभागे कौमारव्याकरणस्योल्लेखो दृश्यते ।

१.६.६.५ सारस्वतम् ।

सारस्वतं व्याकरणन्तु शाकटायनर्क्तन्त्राख्यानि व्याकरणानि मुद्रितान्यत एव सुलभानि सन्ति ।

१.६.६.६ आपिशलम् ।

आपिशलमिति नामकं व्याकरणं पाणिनीयसूत्रेषु यथा - ''वा सुप्यापिशलेः[१४९]'' इत्यत्रापिशलिनाम्ना निर्दिष्टत्वात् तदापिशलव्याकरणं पाणिनेः पूर्वमासीत् ।

१.६.६.७ शाकलम् ।

शाकलमिति व्याकरणं पाणिनीयसूत्रेषु यथा - ''लोपः शाकल्यस्य[१५०]'' ''सर्वत्र शाकल्यस्य[१५१]'' इत्यनयोस्सूत्रयोर्निर्दिष्टत्वात् शाकलं व्याकरणमपि पाणिनेः पूर्वमासीत् ।

१.६.६.८ पाणिनीयव्याकरणम् ।

पाणिनीयव्याकरणन्तु साम्प्रतिके सर्वत्र प्रचलत्येव । एवम् ''अवङ् स्फोटायनस्य[१५२]'' इत्युक्तेः स्फोटायनम्, ''चयो द्वितीयाः शरि

---

148 पा.सू. ५।१।२१

149 पा.सू. ६।१।९२

150 पा.सू. ८।३।१९

151 पा.सू. ८।४।५१

पौष्करसादेरिति वाच्यम्[१५३]'' इति वार्तिकात् पौष्करसादिव्याकरणम् । विन्दतिश्चान्द्रदौर्गादेः, इत्युक्तेदौर्गव्याकरणम्, व्याघ्रभूत्यादयस्त्वेनम्, इतिकारिकाबलाद् व्याघ्रभूतेः व्याकरणञ्चासीदिति । एवमप्याशुबोध - जैनेन्द्रमुग्धबोध - कलापादीनि बहूनि व्याकरणानि सन्ति । सत्स्वपि सर्वेषु व्याकरणेषु सार्वलौकिकवैदिकशब्दानां नितरां व्युत्पादकं पाणिनीयव्याकरणमेव, पाणिनीयव्याकरणस्य, पाणिनीयव्याकरणन्नाम , पणनं पणः, इत्यत्र '' पण - व्यवहारे स्तुतौ च[१५४] '' इत्यस्माद्धातोः ''घञर्थे कविधानम्[१५५] '' इत्यनेन कप्रत्यये सति पणः, सोस्यास्तीति पणी, पणिनो गोत्रापत्यं पाणिनिः, अत्र ''गाथिविदथिकेशिगणिपणिनश्च[१५६]'' इति सूत्रेण पणिन्शब्दात् इञ्प्रत्यये ''तद्धितेष्वचामादेः[१५७]'' इत्यनेनादौ वृद्धौ, प्रातिपदिकत्वात् स्वादिकार्य्ये पाणिनिः शब्दो निष्पन्नो भवति, पाणिनिना प्रोक्तं पाणिनीयम् ''वृद्धाच्छः[१५८]'' इत्यनेन छप्रत्यये, छस्य ईयादेशे सति पाणिनीयशब्दो भवति, अथवा पाणिनिनोपज्ञातं पाणिनीयम् ''उपज्ञाते[१५९]'' इत्यनेन छप्रत्यये, ''आयनेयीनीयियः फढखछघां

---

152 पा.सू. ६।१।१२३

153 वा.सू. ३०

154 भ्वादिः ४६९

155 वा.सू. ७३९

156 पा.सू. ६।४।१६५

157 पा.सू. ७।२।११७

158 पा.सू. ४।२।११४

159 पा.सू. ४।३।११५

प्रत्ययादीनाम्[160]'' इत्यनेन छस्येयादेशे स्वादिकार्य्ये सति पाणिनीयम्भवति, वा पाणिनेरिदं पाणिनीयम् इत्यस्मिन् विग्रहे ''वृद्धाच्छः[161]'' इति सूत्रेण छप्रत्यये, छस्य स्थाने ''आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्[162]'' इत्यनेन ईयादेशे, स्वादिकार्ये सति पाणिनीयमिति शब्दो निष्पद्यते । पाणिनीयञ्च तद् व्याकरणमिति पाणिनीयव्याकरणम् ।

**१.७ वेदाङ्गानामुपादेयता ।**

वेदविदां स्मृतिधर्मे प्रमाणम् । वेदविदामिति विशेषणदानेन वेदमूलत्वेन स्मृत्यादीनां प्रामाण्यमिति तात्पर्यम् । इष्टप्राप्ति- अनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः' ।

अतिगभीरस्य वेदस्य शब्दानां ''अङ्ग्यन्ते ज्ञायन्ते वेदा अमीभिरिति अङ्गानि, अगि गतौ[163] अर्थमवबोधयितुं शिक्षादीनि षडङ्गानि प्रवृत्तानि, अत एव तेषामपरविद्यारूपत्वं मुण्डकोपनिषदि कथितं यत् - '' द्वे विद्ये वेदितव्ये इति ह स्म यद् ब्रह्मविदो वदन्ति[164] '' परा चैवापरा च, तत्रापरा ऋग्वेदः, यजुर्वेदः, सामवेदोथर्ववेदः, तेषां ज्ञानाय वेदपुरुषस्य ज्ञानाय षडङ्गानि महर्षिभिर्विरचितानि सन्ति, यथा -

---

160 पा. सू. ७।१।२

161 पा.सू. ४।२।११४

162 पा.सू. ७।१।२

163 भ्वादि..१५०

164 मुण्डकोपनिषद्

शिक्षा, कल्पो, व्याकरणं, निरुक्तं, छन्दो, ज्यौतिषमिति, तद्यथा पाणिनीयशिक्षायां लिखितम् -

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोथ पठ्यते**
**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ।**
**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्**
**तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते[१६५] ।।**

भगवान् पतञ्जलिः पाणिनीयव्याकरणं स्मारं स्मारं महाभाष्यस्य पस्पशाह्निके लिखति यद्, यथा लोके वेदे चेति प्रयोक्तव्ये, यथा लौकिकिवैदिकेषु प्रयुञ्जते । यथा लौकिकेषु वैदिकेषु च कृतान्तेषु । लोके तावदभक्ष्यो ग्राम्यकुक्कुटोभक्ष्यो ग्राम्यशूकर इत्युच्यते । भक्ष्यं च नाम क्षुत्प्रतीघातार्थमुपादीयते । शक्यं चानेन श्वमांसादिभिरपि क्षुत्प्रतिहन्तुम् । शकेः कर्मसामान्ये लिङ्गसर्वनामनपुंसकयुक्ते कृत्यप्रत्ययः, ततः पदान्तरसम्बन्धाद् उपजायमानमपि स्त्रीत्वं बहिरङ्गत्वादन्तरङ्गं संस्कारं न बाधत इति शक्यं क्षुदित्युक्तम्, तत्र नियमः क्रियते, इदं भक्ष्यमिदभक्ष्यमिति । तथा - खेदात् स्त्रीषु प्रवृत्तिर्भवति, समानश्च खेदविगमो गम्यायां चागम्यायां च । तत्र नियमः क्रियते, इयं गम्येयमगम्येति ।

वेदे खल्वपि[१६६] - ''पयोव्रतो ब्राह्मणः, यवागूव्रतो राजन्यः, आमिक्षाव्रतो वैश्यः'' इत्युच्यते । व्रतं च नामाढ भ्यवहारार्थमुपादीयते । शक्यं चानेन शालिमांसादीन्यपि व्रतयितुम् । तत्र नियमः क्रियते, तथा - ''बैल्वः खादिरो वा यूपः स्यादित्युच्यते ।

---

165 पाणिनीयशिक्षा

166 म.भा.पस्पशाह्निकम्

यूपश्च नाम पश्वनुबन्धार्थमुपादीयते । शक्यं चानेन किञ्चिदेव काष्ठमुच्छ्रित्यानुच्छ्रित्य वा पशुरनुबन्द्धुम् । तत्र नियमः क्रियते । लोकतोर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः क्रियते । किमिदं धर्मनियम इति ? धर्माय नियमो धर्मनियमः । धर्मार्थो वा नियमो धर्मनियमः । धर्मप्रयोजनो वा नियमो धर्मनियमः । तथाग्नौ कपालान्यधिश्रित्याभिमन्त्रयते – ''भृगूणामङ्गिरसां तपसा तप्यध्वम्'' इति । अन्तरेणापि मन्त्रमग्निर्दहनकर्मा कपालानि सन्तापयति । तत्र शास्त्रेण नियमः क्रियते – एवं क्रियमाणं कार्य्यमभ्युदयकारि भवतीति । एवमिहापि समानायामर्थावगतौ शब्देन चापशब्देन च धर्मनियमः क्रियते – शब्देनैवार्थोभिधेयो नापशब्देनेत्येवं क्रियमाणमभ्युदयकारि भवति । ''अस्त्यप्रयुक्तः[१६७]'' इत्यस्मिन् वार्तिके पतञ्जलिः कथयति यद् ''ननु च भवानप्यभ्यन्तरो लोके । अभ्यन्तरोहं लोके न त्वहं लोकः[१६८] , इत्थं वेदाङ्गानामुपदेयतां प्रतिपाद्य विस्तारभयादुपप्रकरणमिदमत्रैव समाप्यते ।

## १.८ उपसंहारः ।

तदनन्तरं दृश्यत ईश्वरोनेन तदिति दर्शनम् , अतो वेदपुरुषस्य दर्शनार्थं वा ज्ञानार्थं षड् दर्शनानि सन्ति, तेषु षट्सु दर्शनेषु सांख्यदर्शनं ह्वदि निधाय 'व्यासोच्छिष्टं जग्त्सर्व्वम्' इत्यनुसारं पुराणमेव वास्तविकदृष्ट्या भारतस्येतिहासो वर्तते, तेष्वेव भारतीयजीवनस्यादर्शस्य, भारतीयसभ्यतायाः, संस्कृतेस्तथा भारतीयस्य

---

167 म.भा.पस्पशाह्निकम्

168 म.भा.पस्पशाह्निकम्

विद्यावैभवस्य वास्तविकं ज्ञानं प्राप्तुं शक्नोति, अतः पुराणेषु यज्ज्ञानमस्ति, तदेव ज्ञानमन्यत्र वर्तते, एतेषु यज्ज्ञानन्नास्ति, तज्ज्ञानमन्यत्र नास्ति, अतो लिखितमस्ति यद् -

**पुराणं सर्वतीर्थेषु तीर्थं चाधिकमुच्यते ।**
**यस्यैकपादश्रवणाद्धरिरेव प्रसीदति[१६९] ।।**
**इतिहासपुराणैस्तु निश्चयोयं कृतः पुरा ।**
**यन्न दृष्टं हि वेदेषु तत्सर्वं लक्ष्यते स्मृतौ ।**
**उभयोर्यन्न दृष्टं हि तत्पुराणैः प्रगीयते[१७०] ।।**
**पापं संक्षीयते नित्यं धर्मश्चैव विवर्धते ।**
**पुराणश्रवणाज्ज्ञानी न संसारं प्रपद्यते[१७१] ।।**

इत्थं श्रीव्यासेन विरचितेषु 'पुराणेषु सांख्ययोगवेदान्तविमर्शः' इति मम शोधमहानिबन्धस्य विषयं स्मारं स्मारं ध्यायं ध्यायं च समेषु पुराणेषु सांख्ययोगवेदान्तस्य विमर्शन्नाम परिशीलनं चिन्तनमभ्यासं करोमि, शोधमहानिबन्धसारेस्मिन् मया सरला सुबोधा हृद्या च संस्कृतभाषा प्रयुक्ता । अत्राहं विविधसन्दर्भग्रन्थानां समालोचनेन सम्पूर्णसर्वग्राहकं विवेचनात्मकञ्च संशोधनकार्यार्थं यथाशक्यप्रयत्नं कृतवानस्मि । प्रस्तुतोयं शोधमहानिबन्धसारो नूतनदिशासूचको विशिष्टाधिगमान्वितोस्ति, तथा च विविधसंशोधनकार्येषु ममायं प्रयत्नः सांख्यजिज्ञासूनां पुराणज्ञानपिपासूनां च कृते नूतनदिशाप्रदः सिद्धो भविष्यति । श्रीमता

---

[169] पद्मपु.-स्वर्गखण्डः-६२।५९

[170] कल्याण-पुराणकथाङ्क-पृष्ठसंख्या-८

[171] कल्याण-पुराणकथाङ्क-पृष्ठसंख्या-९

व्यासेन निर्दिष्टमार्गमनुस्मरन्नहं मम मनसि स्थितं लक्ष्यमवश्यमेव प्राप्स्यामीत्याशान्वितोस्मि । तथा च ममायमायासः सर्वथा सांख्यदर्शनजिज्ञासूनां तथा पुराणान्यधीयते विदन्ति, तेषां पौराणिकानाञ्च कृत महानुपकारको लोकोपकारकश्च भूयादिति मे अभ्यर्थना ।